|| श्री ||

## श्रीमदानन्दतीर्थभगवत्पादविरचित:

# || श्रीमहाभारततात्पर्यनिर्णय: ||

## अथ प्रथमोध्याय:

*[सर्वशास्त्रतात्पर्यनिर्णय:]*

ॐ || नारायणाय परिपूर्णगुणार्णवाय
विश्वोदयस्थितिलयोन्नियति प्रदाय |
ज्ञानप्रदाय विबुधासुरसौख्यदु:ख
सत्कारणाय वितताय नमो नमोनमस्ते || १ ||

आसीदुदारगुणवारिधिरप्रमेयो
नारायण: परतम: परमात् स एक: |
संशान्तसंविदखिलं जठरे निधाय
लक्ष्मीभुजान्तरगत: स्वरतोऽपि चाग्रे || २ ||

तस्योदरस्थजगत: सदमन्दसान्द्र-
स्वानन्दतुष्टवपुषोऽपि रमारमस्य |
भूत्यै निजाश्रितजनस्य हि सृज्यसृष्टा-
वीक्षा बभूव परनामनिमेषकान्ते || ३ ||

दृष्ट्वा स चेतनगणान् जठरे शयाना-
नानन्दमात्रवपुष: सृतिविप्रमुक्तान् |
ध्यानं गतान्त्सृतिगतांश्च सुषुप्तिसंस्थान्
ब्रह्मादिकान् कलिपरान् मनुजांस्तथैक्षत् || ४ ||

स्रक्ष्ये हि चेतनगणान्त्सुखदु:खमध्य-
सम्प्राप्तये तनुभ्रुतां विहृतं ममेच्छन् |
सोऽयं विहार इह मे तनुभृत्स्वभाव-
सम्भूतये भवति भूतिकृदेव भूत्या: || ५ ||

इत्थं विचिन्त्य परम: स तु वासुदेव-
नामा बभूव निजमुक्तिपदप्रदाता |
तस्याऽज्ञयैव नियताऽथ रमाऽपि रूपं
बभ्रे द्वितीयमपि यत् प्रवदन्ति मायाम् || ६ ||

सङ्कर्षणश्च स बभूव सुनित्य:
संहारकारणवपुस्तदनुज्ञयैव |
देवी जयेत्यनु बभूव स सृष्टिहेतो:
प्रद्युम्नतामुपगत: कृतितां च देवी || ७ ||

स्थित्यै पुन: स भगवाननिरुद्धनामा
देवि च शान्तिरभवच्छरदां सहस्रम् |
स्थित्वा स्वमूर्तिभिरमूभिरचिन्त्यश्क्ति:
प्रद्युम्नरूपक इमाश्चरमात्मनेऽदात् || ८ ||

निर्देहकान्त्स भगवाननिरुद्धनामा
जीवान्त्स्वकर्मसहितानुदरे निवेश्य |
च्क्रेऽथ देहसहितान् क्रमश:
स्वयम्भुप्राणात्मशेषगरुडेशमुखान् समग्रान् || ९ ||

|| १० ||

पञ्चात्मक: स भगवान् द्विषडात्मकोऽभूत्
पञ्चद्वयी शतसहस्रपरोऽमितश्च |
एक: समोऽप्यखिलदोषसमुज्झितोऽपि
सर्वत्र पूर्णगुणकोऽपि बहूपमोऽभूत् || १० ||

निर्दोषपूर्णगुणविग्रह आत्मत्न्त्रो
निश्चेतनात्मकशरीरगुणैश्च हीन: |
आनन्दमात्रकरपादमुखोदरादि:
सर्वत्र च स्वगतभेदविवर्जितात्मा || ११ ||

कालाच्च देशगुणतोऽस्य नचाऽदिरन्तो
वृद्धिक्षयौ नतु परस्य सदातनस्य ।
नैतादृश: क्वच बभूव नचैव भाव्यो
नास्त्युत्तर: किमु परात् परमस्य विष्णो: ॥ १२ ॥

सर्वज्ञ ईश्वरतम: स च सर्वशक्ति:
पूर्णाव्ययात्मबलचित्सुखावीर्यसार: ।
यस्याऽज्ञया रहितमिन्दिरया समेतं
ब्रह्मेशपूर्वकमिदं न तु कस्य चेशम् ॥ १३ ॥

आभासकोऽस्य पवन: पवनस्य रुद्र:
शेषात्मको गरुड एव च शक्रकामौ ।
वीन्द्रेशयोस्तदपरे त्वनयोश्च तेषा-
मृष्यादय: क्रमश ऊनगुणा: शतांशा: ॥ १४ ॥

आभासका त्वथ रमाऽस्य मरुत्स्वरूपा-
च्छ्रेष्ठाऽप्यजात् तदनु गी: शिवतो वरिष्ठा ।
तस्या उमा विपतिनी च गिरिस्तयोस्तु
श्च्यादिका: क्रमश एव यथा पुमांस: ॥ १५ ॥

ताभ्याश्च ते शतगुणैर्दशतो वरिष्ठा:
पञ्चोत्तरैरपि यथा क्रमत: श्रुतिस्था: ।
शब्दो बहुत्ववचन: शतमित्यतश्च
श्रुत्यन्तरेषु बहुधोक्तिविरुद्धता न ॥ १६ ॥

तेषां स्वरूपमिदमेव यतोऽथ मुक्ता
अप्येवमेव सततोच्चविनीचरुपा: ।
शब्द: शतं दश सहस्रमिति स्म यस्मात्
तस्मान्न हीनवचनोऽथ ततोऽग्र्यरूपा: ॥ १७ ॥

एवं नरोत्तमपरास्तु विमुक्तियोग्या
अन्ये च संसृतिपरा असुरास्तमोगा: |
एवं सदैव नियम: क्वचिदन्यथा न
यावन्न पूर्त्तिरुत संसृतिगा: समस्ता: || १८ ||

पूर्त्तिश्च नैव नियमाद् भविता हि यस्मात्
तस्मात् समाप्तिमपि यान्ति न जीवसङ्घा: |
आनन्त्यमेव गणशोऽस्ति यतो हि तेषा-
मित्थं तत: सकलकालगता प्रवृत्ति: || १९ ||

|| २० ||

एतै: सुरादिभिरतिप्रतिभादियुक्तै:
युक्तै: सहैव सततं प्रविचिन्तयद्भि: |
पूर्त्तेरचिन्त्यमहिम: परम: परात्मा
नारायणोऽस्य गुणविस्तृतिरन्यगा क्व || २०||

साम्यं नचास्य परमस्य च केन चाऽप्यं
मुक्तेन च क्वचिदतस्त्वभिदा कुतोऽस्य |
प्राप्येत चेतनगणै: सततास्वतन्त्रै-
र्न्नित्यस्वतन्त्रवपुष: परमात् परस्य || २१ ||

अत्र्थोऽयमेव निखिलैरपि वेदवाक्यै
रामायणै: सहितभारतपञ्चरात्रै: |
अन्यैश्च शास्त्रवचनै: सह तत्वसूत्रै-
र्न्निर्णीयते सहृदयं हरिणा सदैव || २२ ||

नारायणस्य न सम: पुरुषोत्तमोऽहं
जीवाक्षरे ह्यतिगतोऽस्मि ततोऽन्यदार्त्तम् |
मुक्तोपसृप्य इह नास्ति कुतश्च कश्चि-
न्नानेव धर्मपृथगात्मदृगेत्यधो हि || २३ ||

आभास एव पृथगीशत एष जीवो
मुक्तस्य नास्ति जगतो विषये तु शक्ति: |
मात्रापरोऽसि नतु तेऽश्नुवते महित्वं
षाड्गुण्यविग्रह सुपूर्णगुणैकदेह: || २४ ||

माहात्म्यदेह सृतिमुक्तिगते शिवाश्च
ब्रह्मा च तद्गुणगतौ न कथञ्चनेशौ |
न श्री: कुतस्तदपरेऽस्य सुखस्य मात्रा-
मश्नन्ति मुक्तसुगणाश्च शतावरेण || २५ ||

आभासकाभासपरावभास
रूपाण्यजस्राणि च चेतनानाम् |
विष्णो: सदैवाति वशात् कदाऽपि
गच्छन्ति केशादिगणा न मुक्तौ || २६ ||

यस्मिन् परेऽन्येऽप्यजजीवकोशा
नाहं परायुर्न्न मरीचिमुख्या: |
जानन्ति यद्गुणगणान् न रमादयोऽपि
नित्यस्वतन्त्र उत कोऽस्ति तदन्य ईश: || २७ ||

नैवैक एव पुरुष: पुरुषोत्तमोऽसा-
वैक: कुत: स पुरुषो यत एव जात्या |
अत्थार्च्छ्रुतेश्च गुणतो निजरूपतश्च
नित्यान्य एव कथमस्मि स इत्यपि स्यात् || २८ ||

सर्वोत्तमो हरिरिदं तु तदाज्ञयैव
चेत्तुं क्षमं स तु हरि: परमस्वतन्त्र: |
पूर्णाव्ययागणितनित्यगुणार्णवोऽ-
सावित्येव वेदवचनानि परोक्तयश्च || २९ ||

॥ ३० ॥

ऋगादयश्च चत्वार: पञ्चरात्रं च भारतम् ।
मूलरामायणं ब्रह्मसूत्रं मानं स्वत: स्मृतम् ॥ ३० ॥

अविरुद्धं च यत्त्वस्य प्रमाणं तच्च नान्यथा ।
एतद्विरुद्धं यत्तु स्यान्नतन्मानं कथञ्चन ॥ ३१ ॥

वैष्णवानि पुराणानि पञ्चरात्रात्मकत्वत: ।
प्रमाणान्येव मन्वाद्या: स्मृतयोऽप्यनुकूलत: ॥ ३२ ॥

एतेषु विष्णोराधिक्यमुच्यतेऽन्यस्य न क्वचित् ।
अतस्तदेव मन्तव्यं नान्यथा तु कथञ्चन ॥ ३३ ॥

मोहार्थान्यन्यशास्त्राणि कृतान्येवाऽज्ञया हरे: ।
अतस्तेषूक्तमग्राह्यमसुराणां तमोगते: ॥ ३४ ॥

यस्मात् कृतानि तानीह विष्णुनोक्तै: शिवादिभि: ।
एषां यन्न विरोधि स्यात् तत्रोक्तं तन्न वार्यते ॥ ३५ ॥

विष्वाधिक्यविरोधीनि यानि वेदवचांस्यपि ।
तानि योज्यान्यानुकूल्याद् विष्णवाधिक्यस्य सर्वश: ॥ ३६ ॥

अवतारेषु यत् किञ्चिद् दर्शयेन्नरवद्धरि: ।
तच्चासुराणां मोहाय दोषा विष्णोर्न्नहि क्वचित् ॥ ३७ ॥

अज्ञत्वं पारवश्यं वा वेधभेदादिकं तथा ।
तथा प्राकृतदेहत्वं देहत्यागादिकं तथा ॥ ३८ ॥

अनीशत्वं च दु:खित्वं साम्यमन्यैश्च हीनताम् ।
प्रदर्शयति मोहाय दैत्यादीनां हरि: स्वयम् ॥ ३९ ॥

|| ४० ||

न तस्य कश्चिद् दोषोऽस्ति पूर्णाखिलगुणो ह्यसौ |
सर्वदेहस्थरूपेषु प्रादुर्भाविषु चेश्वर: || ४०||

ब्रह्माद्यभेद: साम्यं वा कुतस्तस्य महात्मन: |
यदेवंवाचकं शास्त्रं तद्धि शास्त्रं परं मतम् || ४१ ||

निर्णयायैव यत् प्रोक्तं ब्रह्मसूत्रं तु विष्णुना |
व्यासरूपेण तद् ग्राह्यं तत्रोक्ता: सर्वनिर्णया: || ४२ ||

यथार्थवचनानां च मोहार्थानां च संशयम् |
अपनेतुं हि भगवान् ब्रह्मसूत्रमचीक्ल्पत् || ४३ ||

तस्मात् सूत्रार्थमागृह्य कर्त्तव्य: सर्वनिर्णय: |
सर्वदोषविहीनत्वं गुणै: सर्वैरूदीर्णता || ४४ ||

अभेद: सर्वरूपेषु जीवभेद: सदैव च |
विष्णोरुक्तानि सूत्रेषु सर्ववेदेड्यता तथा || ४५ ||

तारतम्यं च मुक्तानां विमुक्तिर्विद्यया तथा |
तस्मादेतद्विरुद्धं यन्मोहार्थं तदुदाहृतम् || ४६ ||

तस्माद् येये गुणा विष्णोर्ग्राह्यास्ते सर्व एव हि |
इत्याद्युक्तं भगवता भविष्यत्पर्वणि स्फुटम् || ४७ ||

एष मोहं सृजाम्याशु यो जनान् मोहयिष्यति |
त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय || ४८ ||

अतत्थ्यानि वितत्थ्यानि दर्शयस्व महाभुज |
प्रकाशं कुरु चाऽत्मानमप्रकाशं च मां कुरु || ४९ ||

॥ ५० ॥

इति वाराहवचनं ब्रह्माण्डोक्तं तथाऽपरम् ।
अमोहाय गुणा विष्णोराकारश्चिच्छरीरता ॥ ५० ॥

निर्दोषत्वं तारतम्यं मुक्तानामपि चोच्यते ।
एतद्विरुद्धं यत् सर्वं तन्मोहायेति निर्णयः ॥ ५१ ॥

स्कान्देऽप्युक्तं शिवेनैव षण्मुखायैव सादरम् ।
शिवशास्त्रेऽपि तद् ग्राह्यं भगवच्छास्त्रयोगि यत् ॥ ५२ ॥

परमो विष्णुरेवैकस्तज्ज्ञानं मोक्षसाधनम् ।
शास्त्राणां निर्णयस्त्वेष तदन्यन्मोहनाय हि ॥ ५३ ॥

ज्ञानं विना तु या मुक्तिः साम्यं च मम विष्णुना ।
तीर्थादिमात्रतो ज्ञानं ममाऽधिक्यं च विष्णुतः ॥ ५४ ॥

अभेदश्चास्मदादीनां मुक्तानां हरिणा तथा ।
इत्यादि सर्वं मोहाय कत्थ्यते पुत्र नान्यथा ॥ ५५ ॥

उक्तं पाद्मपुराणे च् शैव एव शिवेन तु ।
यदुक्तं हरिणा पूर्वमुमायै प्राह तद्वरः ॥ ५६ ॥

त्वामाराद्ध्य तथा शम्भो ग्रहीष्यामि वरं सदा ।
द्वापरादौ युगे भूत्वा कलया मानुषादिषु ॥ ५७ ॥

स्वागमैः कल्पितैस्त्वं च जनान् मद्विमुखान् कुरु ।
मां च गोपाय येन स्यात् सृष्टिरेषोत्तराधरा ॥ ५८ ॥

नच वैष्णवशास्त्रेषु वेदेष्वपि हरेः परः ।
क्वचिदुक्तोऽन्यशास्त्रेषु परमो विष्णुरीरितः ॥ ५९ ॥

|| ६० ||

निर्दोषत्वाच्च वेदानां वेदोक्तं ग्राह्यमेव हि |
वेदेषु च परो विष्णु: सर्वस्मादुच्यते सदा || ६० ||

अस्य देवस्य मीळ्हुषो वया
विष्णोरेषस्य प्रभृथे हविर्भि: |
विदे हि रुद्रो रुद्रियं महित्वं
यासिष्टं वर्त्तिरश्विनाविरावत् || ६१ ||

स्तुहि श्रुतं गर्त्तसदं युवानं
मृगं न भीममुपहन्तुमुग्रम् |
यं कामये तन्तमुग्रं कृणोमि
तं ब्रह्माणं तमृषिं तं सुमेधाम् || ६२ ||

एको नारायण आसीन्न् ब्रह्मा नच शङ्कर: |
वासुदेवो वा इदमग्र आसीन्न ब्रह्मा नच शङ्कर: || ६३ ||

यदा पश्य: पश्यते रुग्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् |
तदा विद्वान् पुण्यपापे विधूय
निरञ्जन: परमं साम्यमुपैति || ६४ ||

यो  वेद निहितं गुहायां परमे व्योमन् |
सोऽश्नुते सर्वान् कामान्त्सह ब्रह्मणा विपश्चिता || ६५ ||

प्र घा न्वस्य महतो महानि
सत्या सत्यस्य करणानि वोचम् |
सत्यमेनमनु विश्वे मदन्ति
रातिं देवस्य गृणतो मघोन: || ६६ ||

यच्चिकेत सत्यमित् तन्न् मोघं
वसु स्पार्हमुत जेतोत दाता |
सत्य: सो अस्य महिमा
गृणे शवो यज्ञेषु विप्रराज्ये || ६७ ||

सत्या विष्णोर्गुणा: सर्वे सत्या जीवेश्योर्भिदा |
सत्यो मिथो जीवभेद: सत्यं च जगदीदृशम् || ६८ ||

असत्य स्वगतो भेदो विष्णोर्न्नान्यदसत्यकम् |
जगत्प्रवाह: सत्योऽयं पञ्चभेदसमन्वित: || ६९ ||

|| ७० ||

जीवेशयोर्भिदा चैव जीवभेद: परस्परम् |
जडेशयोर्जडानां च जडजीवभिदा तथा || ७० ||

पञ्चभेदा इमे नित्या: सर्वावस्थासु सर्वश: |
मुक्तानां च हीयन्ते तारतम्यं च सर्वदा || ७१ ||

क्षितिपा मनुष्यगन्धर्वा दैवाश्च पितरश्चिरा: |
आजानजा: कर्मजाश्च देवा इन्द्र: पुरन्दर: || ७२ ||

रुद्र: सरस्वती वायुर्मुक्ता: शतगुणोत्तरा: |
एको ब्रह्मा च वायुश्च वीन्द्रो रुद्रसमस्तथा: || ७३ ||

एको रुद्रस्तथा शेषो न कश्चिद् वायुना सम: |
मुक्तेषु श्रीस्तथा वायो: सहस्रगुणिता गुणै: |
ततोऽनन्तगुणो विष्णुर्न्न कश्चित् तत्सम: सदा || ७४ ||

इत्यादि वेदवाक्यं विष्णोरुत्कर्षमेव वक्त्युच्चै: |
तात्पर्यं महदत्रेत्युक्तं यो मामिति स्वयं तेन || ७५ ||

भूम्नो ज्यायस्त्वमिति ह्युक्तं सूत्रेषु निर्णयात् तेन |
तत्प्रीत्यैव च मोक्ष: प्राप्यस्तेनैव नान्येन || ७६ ||

नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन |
यमेवैष वृणुते तेन लभ्यस्त-
स्यैष आत्मा विवृणुते तनुं स्वाम् || ७७ ||

विष्णु: हि दाता मोक्षस्य वायुश्च तदनुज्ञया |
मोक्षो ज्ञानं च क्रमशो मुक्तिगो भोग एव च || ७८ ||

उत्तरेषां प्रसादेन नीचानां नान्यथा भवेत् |
सर्वेषां च हरिर्न्नित्यनियन्ता तद्वशा: परे || ७९ ||

|| ८० ||

तारातम्यं ततो ज्ञेयं सर्वोच्चत्वं हरेस्तथा |
एतद् विना न कस्यापि विमुक्ति: स्यात् कथञ्चन || ८० ||

पञ्चभेदांश्च विज्ञाय विष्णो: स्वाभेदमेव च |
निर्द्दोषत्वं गुणोद्रेकं ज्ञात्वा मुक्तिर्न्नचान्यथा || ८१ ||

अवतारान् हरेर्ज्ञात्वा नावतारा हरेश्च ये |
तदावेशांस्तथा सम्यग् ज्ञात्वा मुक्तिर्न्नचान्यथा || ८२ ||

सृष्टिरक्षाहृतिज्ञाननियत्यज्ञानबन्धनान् |
मोक्षं च विष्णुतस्त्वेव ज्ञात्वा मुक्तिर्न्नचान्यथा || ८३ ||

वेदांश्च पञ्चरात्राणि सेतिहासपुराणकान् |
ज्ञात्वा विष्णुपरानेव मुच्यते नान्यथा क्वचित् || ८४ ||

माहात्म्यज्ञानपूर्वस्तु सुदृढ: सर्वतोऽधिक: |
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न्नचान्यथा || ८५ ||

त्रिविधा जीवसङ्घास्तु देवमानुषदानवा: |
तत्र देवा मुक्तियोग्या मानुषेषूत्तमास्तथा || ८६ ||

मध्यमा मानुषा ये तु सृतियोग्या: सदैव हि |
अधमा निरयायैव दानवास्तु तमोलया: || ८७ ||

मुक्तिर्न्नित्या तमश्चैव नाऽवृत्ति: पुनरेतयो: |
देवानां निरयो नास्ति तमश्चापि कथञ्चन || ८८ ||

नासुराणां तथा मुक्ति: कदाचित् केनचित् क्वचित् |
मानुषाणां मध्यमानां नैवैतद् द्वयमाप्यते || ८९ ||

|| ९० ||

असुराणां तम:प्राप्तिस्तदा नियमतो भवेत् |
यदा तु ज्ञानिसद्भावे नैव गृह्णन्ति तत् परम् || ९० ||

तदा मुक्तिश्च देवानां यदा प्रत्यक्षगो हरि: |
स्वयोग्ययोपासनया तन्वा तद्योग्यया तथा || ९१ ||

सर्वैर्गुणैर्ब्रह्मणा तु समुपास्यो हरि: सदा |
आनन्दो ज्ञ: सदात्मेति ह्युपास्यो मानुषै: हरि: || ९२ ||

यथाक्रमं गुणोद्रेकात् तदन्यैरा विरिञ्चत: |
ब्रह्मत्वयोग्या ऋजवो नाम् देवा: पृथग् गणा: || ९३ ||

तैरेवाप्यं पदं तत्तु नैवान्यै: साधनैरपि |
एवं सर्वपदानां च योग्या: सन्ति पृथग् गणा: || ९४ ||

तस्मादनाद्यनन्तं हि तारतम्यं चिदात्मनाम् |
तच्च नैवान्यथा कर्त्तुं शक्यं केनापि कुत्राचित् || ९५ ||

अयोग्यमिच्छन् पुरुष: पतत्येव न संशय: |
तस्माद् योग्यानुसारेण सेव्यो विष्णु: सदैव हि || ९६ ||

अच्छिद्रसेवनाच्चैव निष्कामत्वाच्च योग्यत: |
द्रष्टुं शक्यो हरि: सर्वैर्न्नान्यथा तु कथञ्चन || ९७ ||

नियमोऽयं हरेर्यस्मान्नोल्लङ्घ्य: सर्वचेतनै: ।
सत्यसङ्कल्पतो विष्णुर्नान्यथा च करिष्यति ॥ ९८ ॥

दानतीर्त्थतपोयज्ञपूर्वा: सर्वेऽपि सर्वदा ।
अङ्गानि हरिसेवायां भक्तितस्त्वेका विमुक्तये ।
भविष्यत्पर्ववचनमित्येतदखिलं परम् ॥ ९९ ॥

॥ १०० ॥

शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमान: ।
एधमानद्विळुभयस्य राजा
चोष्कूयते विश इन्द्रो मनुष्यान् ॥ १०० ॥

परा पूर्वेषां सख्या वृणक्ति वितर्त्तुराणो अपरेभिरेति ।
अनानुभूतिरवधून्वान: पूर्वीरिन्द्र: शरदस्तर्त्तरीति ॥ १०१॥

तमेवं विद्वानमृत इह भवति
नान्य: पन्था अयनाय विद्यते ।
तमेव विदित्वाऽति मृत्युमेति
नान्य: पन्था विद्यतेऽयनाय ॥ १०२ ॥

यस्य देवे परा भक्तिर्य्यथा देवे तथा गुरौ ।
तस्यैतेऽक्थिता ह्यर्त्था: प्रकाशन्ते महात्मन: ॥ १०३ ॥

भक्त्यर्त्थान्यखिलान्येव भक्तिर्मोक्षाय केवला ।
मुक्तानामपि भक्ति: हि नित्यानन्दस्वरूपिणी ॥ १०४ ॥

ज्ञानपूर्व: पर: स्नेहो नित्यो भक्तिरितीर्यते ।
इत्यादि वेदवचनं साधनप्रविधायकम् ॥ १०५ ॥

निश्शेषधर्मकर्ताऽप्यभक्तस्ते नरके हरे ।
सदा तिष्ठति भक्तश्चेद् ब्रह्महाऽपि विमुच्यते ॥ १०६ ॥

धर्म्मो भवत्यधर्म्मोऽपि कृतो भक्तैस्तवाच्युत ।
पापं भवति धर्म्मोऽपि यो न भक्तैः कृतो हरे ॥ १०७ ॥

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्ज्जुन ।
ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुं च परन्तप ॥ १०८ ॥

अनादिद्वेषिणो दैत्या विष्णौ द्वेषो विवर्द्धितः ।
तमस्यन्धे पातयति दैत्यानन्ते विनिश्चयात् ॥ १०९ ॥

॥ ११० ॥

पूर्णदुःखात्मको द्वेषः सोऽनन्तो ह्यवतिष्ठते ।
पतितानां तमस्यन्धे निःशेषसुखवर्ज्जिते ॥ ११० ॥

जीवाभेदो निर्गुणत्वमपूर्णगुणता तथा ।
साम्याधिक्ये तदन्येषां भेदस्तद्गत एव च ॥ १११ ॥

प्रादुर्भावविपर्य्यासस्तद्भक्तद्वेष एव च ।
तत्प्रमाणस्य निन्दा च द्वेषा एतेऽखिला मताः ॥ ११२ ॥

एतैर्विहीना या भक्तिः सा भक्तिरिति निश्चिता ।
अनादिभक्तिर्द्देवानां क्रमाद् वृद्धिं गतैव सा ॥ ११३ ॥

अपरोक्षदृशेः हेतुर्म्मुक्तिहेतुश्च सा पुनः ।
सैवाऽनन्दस्वरूपेण नित्या मुक्तेषु तिष्ठति ॥ ११४ ॥

यथा शौक्ल्यादिकं रूपं गोर्भवत्येव सर्वदा ।
सुखज्ञानादिकं रूपमेवं भक्तेर्न्नचान्यथा ॥ ११५ ॥

भक्त्यैव तुष्टिमभ्येति विष्णुर्न्नान्येन केनचित् ।
स एव मुक्तिदाता च भक्तिस्तत्रैककारणम् ॥ ११६ ॥

ब्रह्मादीनां च मुक्तानां तारतम्ये तु कारणम् ।
तारतम्यस्थिताऽनादिनित्या भक्तिर्न्नचेतरत् ॥ ११७ ॥

मानुषेष्वधमा: किञ्चिद् द्वेषयुक्ता: सदा हरौ |
दु:खनिष्ठास्ततस्तेऽपि नित्यमेव न संशय: || ११८ ||

मद्ध्यमा मिश्रभूतत्वान्नित्यं मिश्रफला: स्मृता: |
किञ्चिद्भक्तियुता नित्यमुक्तमास्तेन मोक्षिण: || ११९ ||

|| १२० ||

ब्रह्मण: परमा भक्ति: सर्वेभ्य: परमस्तत: |
इत्यादीनि च वाक्यानि पुराणेषु पृथक्पृथक् || १२० ||

षण्णवत्यङ्गुलो यस्तु न्यग्रोधपरिमण्डल: |
सप्तपादश्चतु: हस्तो द्वात्रिंशल्लक्षणैर्युत: || १२१ ||

असंशय: संशयच्छिद् गुरुरुक्तो मनीषिभि: |
तस्माद् ब्रह्मा गुरुर्म्मुख्य: सर्वेषामेव सर्वदा || १२२ ||

अन्येऽपि स्वात्मनो मुख्या: क्र्माद् गुरव ईरिता: |
क्रमाल्लक्षणहीनाश्च लक्षणालक्षणै: समा: || १२३ ||

मानुषा मद्ध्यमा: सम्यग् दुर्ल्लक्षणयुत: कलि: |
सम्यग्लक्षणसम्पन्नो यद् दद्यात् दुप्रसन्नधी: || १२४ ||

शिष्याय सत्यं भवति तत् सर्वं नात्र संशय: |
अगम्यत्वाद्धरिस्तस्मिन्नविष्टो मुक्तिदो भवेत् || १२५ ||

नातिप्रसन्नहृदयो यद् दद्याद् गुरुरप्यसौ |
न तत् सत्यं भवेत् तस्मादर्च्चनीयो गुरु: सदा || १२६ ||

स्वावराणां गुरुत्वं तु भवेत् कारणत: क्वचित् |
मर्य्यादार्थं तेऽपि पूज्या नतु यद्वत् परो गुरु: |
इत्येतत् पञ्चरात्रोक्तं पुराणेष्वनुमोदितम् || १२७ ||

|| श्री ||

श्रीमदानन्दतीर्थभगवत्पादविरचितः

# || श्रीमहाभारततात्पर्यनिर्णयः ||

यदा मुक्तिप्रदानस्य स्वयोग्यं पश्यति ध्रुवम् ।
रूपं हरेस्तदा तस्य सर्वपापानि भस्मसात् ॥ १२८ ॥

यान्ति पूर्वाण्युत्तराणि न श्लेषं यान्ति कानिचित् ।
मोक्षश्च नियतस्तस्मात् स्वेयोग्यहरिदर्शने ॥ १२९ ॥

|| १३० ||

भविष्यत्पर्ववचनमित्येतत् सूत्रगं तथा ।
श्रुतिश्च तत्परा तद्वत् तद्यथेत्यवदत् स्फुटम् ॥ १३० ॥

मुक्तास्तु मानुषा देवान् देवा इन्द्रं स शङ्करम् ।
स ब्रह्माणं क्रमेणैव तेन यान्त्यखिला हरिम् ॥ १३१ ॥

उत्तरोत्तरवश्याश्च मुक्ता रुद्रपुरस्सराः ।
निर्द्दोषा नित्यसुखिनः पुनरावृत्तिवर्ज्जिताः ॥ १३२ ॥

स्वेच्छयैव रमन्तेऽत्र नानिष्टं तेषु किञ्चन ।
असुराः कलिपर्य्यन्ता एवं दुःखोत्तरोत्तराः ॥ १३३ ॥

कलिर्द्दुःखाधिकस्तेषु तेऽप्येवं ब्रह्मवद् गणाः ।
तथाऽन्येऽप्यसुराः सर्वे गणा योग्यतया सदा ॥ १३४ ॥

ब्रह्मैवं सर्वजीवेभ्यः सदा सर्वगुणाधिकः ।
मुक्तोऽपि सर्वमुक्तानामाधिपत्ये स्थितः सदा ।
आश्रयस्तस्य भगवान् सदा नारायणः प्रभुः ॥ १३५ ॥

इत्यृग्यजुःसामाथर्वपञ्चरात्रेतिहासतः ।
पुराणेभ्यस्तथाऽन्येभ्यः शास्त्रेभ्यो निर्ण्णयः कृतः ॥ १३६ ॥

विष्ण्वाज्ञयैव विदुषा तत्प्रसादबलोन्नतेः ।
आनन्दतीर्त्थमुनिना पूर्ण्णप्रज्ञाभिधायुजा ॥ १३७ ॥

तात्पर्यं शास्त्राणां सर्वेषामुत्तमं मया प्रोक्तम् ।
प्राप्यानुज्ञां विष्णोरेतज्ज्ञात्वैव विष्णुराप्योऽसौ ॥ १३८ ॥

*इति श्रीमदानन्दतीर्थभगवत्पादकृते*

*श्रीमहाभारततात्पर्यनिर्णये*

*सर्वशास्त्रतात्पर्यनिर्णयो नाम*

*प्रथमोऽध्याय:*

--- ००० ---

॥ श्री ॥

## श्रीमदानन्दतीर्थभगवत्पादविरचित:

# ॥ श्रीमहाभारततात्पर्यनिर्णय: ॥

## अथ द्वितीयोध्याय:

*[वाक्योद्धार:]*

ॐ ॥ जयति हरिरचिन्त्य: सर्वदेवैकवन्द्य:
परमगुरुरभीष्टावाप्तिद: सज्जनानाम् ।
निखिल गुणगणार्णो नित्यनिर्मुक्तदोष:
सरसिजनयनोऽसौ श्रीपतिर्मानदो न: ॥ १ ॥

उक्त: पूर्वेऽध्याये शास्त्राणां निर्णय: परो दिव्य: ।
श्रीमद्भारतवाक्यान्येतैरेवाद्ध्यवस्यन्ते ॥ २ ॥

क्वचित् ग्रन्थान् प्रक्षिपन्ति क्वचिदन्तरितानपि ।
कुर्यु: क्वचिच्च व्यत्यासं प्रमादात् क्वचिदन्यथा ॥ ३ ॥

अनुत्सन्ना अपि ग्रन्था व्याकुला इति सर्वश: ।
उत्सन्ना: प्रायश: सर्वे कोट्यंशोऽपि न वर्तते ॥ ४ ॥

ग्रन्थोऽप्येवं विलुळित: किम्वर्थो देवदुर्गम: ।
कलावेवं व्याकुलिते निर्णयाय प्र चोदित: ॥ ५ ॥

हरिणा निर्णयान् वच्मि विजानंस्तत्प्रसादत: ।
शास्त्रान्तराणि सञ्जानन् वेदांश्चास्य प्रसादत: ॥ ६ ॥

देशेदेशे तथा ग्रन्थान् दृष्ट्वा चैव पृथग्विधान् ।
यथा स भगवान् व्यास: साक्षान्नारायण: प्रभु: ॥ ७ ॥

जगाद भारताद्येषु तथा वक्ष्ये तदीक्षया ।
सङ्क्षेपात् सर्वशास्त्रार्थं भारतार्थानुसारत: ॥ ८ ॥

निर्णय: सर्वशास्त्राणां भारतं परिकीर्त्तितम् ।
भारतं सर्ववेदाश्च तुल्यमारोपिता: पुरा ॥ ९ ॥

|| १० ||

देवैर्ब्रह्मादिभिः सर्वैरृषिभिश्च समन्वितैः |
व्यासस्यैवाऽऽज्ञया तत्र त्वत्यरिच्यत भारतम् || १० ||

महत्त्वाद् भारवत्त्वाच्च महाभारतमुच्यते |
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते || ११ ||

निर्णयः सर्वशाश्त्राणां सदृष्टान्तो हि भारते |
कृतो विष्णुवशत्वं हि ब्रह्मादीनां प्रकाशितम् || १२ ||

यतः कृष्णवशे सर्वे भीमाद्याः सम्यगीरिताः |
सर्वेषां ज्ञानदो विष्णुर्यशोदातेति चोदितम् || १३ ||

यस्माद् व्यासात्मना तेषां भारते यश ऊचिवान् |
ज्ञानदश्च शुकादीनां ब्रह्मरुद्रादिरूपिणाम् || १४ ||

ब्रह्माऽधिकश्च देवेभ्यः शेषाद् रुद्रादपीरितः |
प्रियश्च विष्णोः सर्वेभ्य इति भीमनिदर्शनात् || १५ ||

भूभारहारिणो विष्णोः प्रधानाङ्गं हि मारुतिः |
मागधादिवधादेव दुर्योधनवधादपि || १६ ||

यो य एव बलज्येष्ठः क्षत्रियेषु स उत्तमः |
अङ्गं चेद् विष्णुकार्येषु तद्भक्त्यैव नचान्यथा || १७ ||

बलं नैसर्गिकं तच्चेद् वरास्त्रादेस्तदन्यथा |
अन्यावेशनिमित्तं चेद् बलमन्यात्मकं हि तत् || १८ ||

देवेषु बलिनामेव भक्तिज्ञाने नचान्यथा |
स एव च प्रियो विष्णोर्न्नान्यथा तु कथञ्चन || १९ ||

|| २० ||

तस्माद् योयो बलज्येष्ठ: स गुणज्येष्ठ एव च |
बलं हि क्षत्रिये व्यक्तं ज्ञायते स्थूलदृष्टिभि: || २० ||

ज्ञानादयो गुणा यस्माज्ज्ञायन्ते सूक्ष्मदृष्टिभि: |
तस्माद् यत्र बलं तत्र विज्ञातव्या गुणा: परे || २१ ||

देवेष्वेव नचान्येषु वासुदेवप्रतीपत: |
क्षत्रादन्येष्वपि बलं प्रमाणं यत्र केशव: || २२ ||

प्रवृत्तो दुष्टनिधने ज्ञानकार्ये तदेव च |
अन्यत्र ब्राह्मणानां तु प्रमाणं ज्ञानमेव हि || २३ ||

क्षत्रियाणां बलं चैव सर्वेषां विष्णुकार्यता |
कृष्णरामादिरूपेषु बलकार्यो जनार्दन: || २४ ||

दत्तव्यासादिरूपेषु ज्ञानकार्यस्तथा प्रभु: |
मत्स्यकूर्मवराहाश्च सिंहवामनभार्गवा: || २५ ||

राघव: कृष्णबुद्धौ च कृष्णद्वैपायनस्तथा |
कपिलो दत्तवृषभौ शिंशुमारो रुचे: सुत: || २६ ||

नारायणो हरि: कृष्णस्तापसो मनुरेव च |
महिदासस्तथा हंस स्त्रीरूपा हयशीर्षवान् || २७ ||

तथैव बडबावक्त्र: कल्की धन्वन्तरि: प्रभु: |
इत्याद्या: केवलो विष्णुर्न्नैषां भेद: कथञ्चन || २८ ||

न विशयो गुणै: सर्वैर्बलज्ञानादिभि: क्वचित् |
श्रीब्रह्मरुद्रौ शेषश्च वीन्द्रेन्द्रौ काम् एव च || २९ ||

॥ ३० ॥

कामपुत्रोऽनिरुद्धश्च सूर्यश्चन्द्रो बृहस्पति: ।
धर्म एषां तथा भार्या दक्षाद्या मनवस्तथा ॥ ३० ॥

मनुपुत्राश्च ऋषयो नारद: पर्वतस्तथा ।
कश्यप: सनकाद्याश्च वह्न्याद्याश्चैव देवता: ॥ ३१ ॥

भरत: कार्त्तवीर्यश्च वैन्याद्याश्चक्रवर्त्तिन: ।
गयश्च लक्ष्मणाद्याश्च त्रयो रोहिणिनन्दन: ॥ ३२ ॥

प्रद्युम्नो रौग्मिणेयश्च तत्पुत्रश्चानिरुद्धक: ।
नर: फल्गुन इत्याद्या विशेषावेशिनो हरे: ॥ ३३ ॥

वालिसाम्बादयश्चैव किञ्चिदावेशिनो हरे: ।
तस्माद् बलप्रवृत्तस्य रामकृष्णात्मनो हरे: ॥ ३४ ॥

अन्तरङ्गं हनूमांश्च भीमस्तत्कार्यसाधकौ ।
ब्रह्मात्मको यतो वायु: पदं ब्राह्ममगात् पुरा ॥ ३५ ॥

वायोरन्यस्य न ब्राह्मं पदं तस्मात् स एव स: ।
यत्र रूपं तत्र गुणा भक्त्याद्या: स्त्रीषु नित्यष: ॥ ३६ ॥

रूपं हि स्थूलदृष्टीनां दृश्यं व्यक्तं ततो हि तत् ।
प्रायो वेत्तुं न शक्यन्ते भक्त्याद्या: स्त्रीषु यत् तत: ॥ ३७ ॥

यासां रूपं गुणास्तासां भक्त्याद्या इति निश्चय: ।
तच्च नैसर्गिकं रूपं द्वात्रिंशल्लक्षणैर्युतम् ॥ ३८ ॥

नालक्षणं वपुर्मात्रं गुणहेतु: कथञ्चन ।
आसुरीणां वरादेस्तु वपुर्मात्रं भविष्यति ॥ ३९ ॥

॥ ४० ॥

न लक्षणान्यतस्तासां नैव भक्ति: कथञ्चन ।
तस्माद् रूपगुणोदारा जानकी रुग्मिणी तथा ॥ ४० ॥

सत्यभामेत्यादिरूपा श्री: सर्वपरमा मता ।
तत: पश्चाद् द्रौपदी च सर्वाभ्यो रूपतो वरा ॥ ४१ ॥

भूभारक्षपणे साक्षादङ्गं भीमवदीशितु: ।
हन्ता च वैरहेतुश्च भीम: पापजनस्य तु ॥ ४२ ॥

दौपदी वैरहेतु: सा तस्माद् भीमादनन्तरा ।
बलदेवस्तत: पश्चात् तत: पश्चाच्च फल्गुन: ॥ ४३ ॥

नरावेशादन्यथा तु दौणि: पश्चात् ततोऽपरे ।
रामवज्जाम्बवत्याद्या: षट् ततो रेवती तथा ॥ ४४ ॥

लक्ष्मणो हनुमत्पश्चात् ततो भरतवालिनौ ।
शत्रुघ्नस्तु तत: पश्चात् सुग्रीवाद्यास्ततोऽवरा: ॥ ४५ ॥

रामकार्यं तु यै: सम्यक् स्वयोग्यं न कृतं पुरा ।
तै: पूरितं तत् कृष्णाय बीभत्स्वाद्यै: समन्तत: ॥ ४६ ॥

अधिकं यै: कृतं तत्र तैरूनं कृतमत्र तत् ।
कर्णाद्यैरधिकं यैस्तु प्रादुर्भावद्वये कृतम् ॥ ४७ ॥

विविदादै: हि पश्चाद् विप्रतीपं कृतं हरे: ।
प्रादुर्भावद्वये ह्यस्मिन् सर्वेषां निर्णय: कृत: ॥ ४८ ॥

नैतयोरकृतं किञ्चच्छुभं वा यदिवाऽशुभम् ।
अन्यत्र पूर्यते क्वापि तस्मादत्रैव निर्णय: ॥ ४९ ॥

|| ५० ||

पश्चात्तनत्वात् कृष्णस्य वैशेष्यात् तत्र निर्णय: |
प्रादुर्भावमिमं तस्माद् गृहीत्वा भारतं कृतम् || ५० ||

उक्त्वा रामकथाऽप्यस्मिन् मार्कण्डेयसमास्यया |
तस्माद् यद् भारते नोक्तं तद्धि नैवास्ति कुत्रचित् || ५१ ||

अत्रोक्तं सर्वशास्त्रेषु नहि सम्यगुदाहृतम् |
इत्यादि कथितं सर्वं ब्रह्माण्डे हरिणा स्वयम् || ५२ ||

मार्कण्डेयेऽपि कथितं भारतस्य प्रशंसनम् |
देवतानां यथा व्यासो द्विपदां ब्राह्मणो वर: || ५३ ||

आयुधानां यथा वज्रमोषधीनां यथा यवा: |
तथैव सर्वशास्त्राणां महाभारतमुत्तमम् || ५४ ||

वायुप्रोक्तेऽपि तत् प्रोक्तं भारतस्य प्रशंसनम् |
कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् |
को ह्यन्य: पुण्डरीकाक्षान्महाभारतकृद् भवेत् || ५५ ||

एवं हि सर्वशास्त्रेषु पृथक्पृथगुदीरितम् |
उक्तोऽर्थ: सर्व एवायं माहात्म्यक्रमपूर्वक: || ५६ ||

भारतेऽपि यथा प्रोक्तो निर्णयोऽयं क्रमेण तु |
तथा प्रदर्शयिष्यामस्तद्वाक्यैरेव सर्वश: || ५७ ||

नारायणं सुरगुरुं जगदेकनाथं
भक्तप्रियं सकललोकनमस्कृतं च |
त्रैगुण्यवर्जितमजं विभुमाद्यमीशं
वन्दे भवघ्नममरासुरसिद्धवन्द्यम् || ५८ ||

ज्ञानप्रद: स भगवान् कमलाविरिञ्च
शर्वादिपूर्वजगतो निखिलाद् वरिष्ठ: |
भक्त्यैव तुष्यति हरिप्रवणत्वमेव
सर्वस्य धर्म इति पूर्वविभागसंस्थ: || ५९ ||

|| ६० ||

निर्दोषक: सृतिविहीन उदारपूर्ण
संविद्गुण: प्रथमकृत् सकलात्मशक्ति: |
मोक्षैकहेतुरसुरूपसुरैश्च मुक्तै:
वन्द्य: स एक इति चोक्तमथोत्त्रार्द्धे || ६० ||

नम्यत्वमुक्तमुभयत्र यतस्ततोऽस्य
मुक्तैरमुक्तिगगणैश्च विनम्यतोक्ता |
इत्थं हि सर्वगुणपूर्त्तिरमुष्य विष्णो:
प्रस्ताविता प्रथमत: प्रतिजानतैव || ६१ ||

कृष्णो यज्ञैरिज्यते सोमपूतै:
कृष्णो वीरैरिज्यते विक्रमद्भि: |
कृष्णो वन्यैरिज्यते सम्मृशानै:
कृष्णो मुक्तैरिज्यते वीतमोहै: || ६२ ||

सृष्टा ब्रह्मादयो देवा निहता येन दानवा: |
तस्मै देवादिदेवाय नमस्ते शार्ङ्गधारिणे || ६३ ||

स्त्रष्टृत्वं देवानां मुक्तिस्त्रष्टृत्वमुच्यते नान्यत् |
उत्पत्तिर्दैत्यानामपि यस्मात् सम्मिता विशेषोऽयम् || ६४ ||

अथ च दैत्यहतिस्तमसि स्थिरा
नियतसंस्थितिरेव नचान्यथा |
तनुविभागकृति: सकलेष्वियं
नहि विशेषकृता सुरदैत्यगा || ६५ ||

तमिममेव सुरासुरसञ्चये
हरिकृतं प्रविशेषमुदीक्षितुम् ।
प्रतिविभज्य च भीमसुयोधनौ
स्वपरपक्षभिदा कथिता कथा ॥ ६६ ॥

नमो भगवते तस्मै
व्यासायामिततेजसे ।
यस्य प्रसादाद् वक्ष्यामि
नारायणकथामिमाम् ॥ ६७ ॥

वासुदेवस्तु भगवान् कीर्त्तितोऽत्र सनातन: ।
प्रतिबिम्बमिवाऽदर्शे यं पश्यन्त्यात्मनि स्थितम् ॥ ६८ ॥

नास्ति नारायणसमं न भूत् न भविष्यति ।
एतेन सत्यवाक्येन सर्वार्त्थान् साधयाम्यहम् ॥ ६९ ॥

॥ ७० ॥

आद्यन्तयोरिन्यवदत् स यस्माद् व्यासात्मको विष्णुरुदारशक्ति: ।
तस्मात् समस्ता हरिसद्गुणानां निर्णीतये भारतगा कथैषा ॥ ७० ॥

सत्यं सत्यं पुन: सत्यमुद्धृत्य भुजमुच्यते ।
वेदशास्त्रात् परं नास्ति न दैवं केशवात् परम् ॥ ७१ ॥

आलोड्य सर्वशास्त्राणि विचार्य च पुन:पुन: ।
इदमेकं सुनिष्पन्नं ध्येयो नारायण: सदा ॥ ७२ ॥

स्मर्त्तव्य: सततं विष्णुर्विस्मर्त्तव्यो न जातुचित् ।
सर्वे विधिनिषेधा: स्युरेतयोरेव किङ्करा: ॥ ७३ ॥

को हि तं वेदितुं शक्तो यो न स्यात् तद्विधोऽपर: ।
तद्विधश्चापरो नास्ति तस्मात् तं वेद सस्वमं ॥ ७४ ॥

को हि तं वेदितुं शक्तो नारायणमनामयम् ।
ऋते सत्यवतीसूनो: कृष्णाद् वा देवकीसुतात् ॥ ७५ ॥

अप्रमेयोऽनियोज्यश्च स्वयं कामगमो वशी ।
मोदत्येष सदा भुतैर्बाल: क्रीडनकैरिव ॥ ७६ ॥

न प्रमातुं महाबाहु: शक्योऽयं मधुसूदन: ।
परमात् परमेतस्माद् विश्वरूपान्न विद्यते ॥ ७७ ॥

वसुदेवसुतो नायं नायं गर्भेऽवसत् प्रभु: ।
नायं दशरथाज्जातो नचापि जमदग्नि: ॥ ७८ ॥

जायते नैव कुत्रापि म्रियते कुत एव तु ।
न वध्यो मुह्यते नायं बद्ध्यते नैव केनचित् ॥ ७९ ॥

॥ ८० ॥

कुतो दु:खं स्वतन्त्रस्य नित्यानन्दैकरूपिण: ।
ईशन्नपि हि देवेश: सर्वस्य जगतो हरि: ॥ ८० ॥

कर्माणि कुरुते नित्यं कीनाश इव दुर्बल: ।
नाऽत्मानं वेद मुग्धोऽयं दु:खी सीतां च मार्गते ॥ ८१ ॥

बद्ध: शक्रजितेत्यादि लीलैषाऽसुरमोहिनी ।
मुह्यते शस्त्रपातेन भिन्नत्वग्रुधिरस्रव: ॥ ८२ ॥

अजानन् पृच्छति स्मान्यांस्तनुं त्यक्त्वा दिवं गत: ।
इत्याद्यसुरमोहाय दर्शयामास नाट्यवत् ॥ ८३ ॥

अविद्यमानमेवेश: कुहकं तद् विदु: सुरा: ।
प्रादुर्भावा हरे: सर्वे नैव प्रकृतिदेहिन: ॥ ८४ ॥

निर्द्दोषा गुणसम्पूर्णा दर्शयत्यन्यथैव तु ।
दुष्टानां नोहनात्थार्य सतामपि तु कुत्रचित् ॥ ८५ ॥

यथायोग्यफलप्राप्त्यै लीलैषा परमात्मन: ।
ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषत: ॥ ८६ ॥

यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यामवशिष्यते ।
अहं कृत्स्नस्य जगत: प्रभव: प्रलयस्तथा ॥ ८७ ॥

मत्त: परतरं नान्यत् किञ्चिदस्ति धनञ्जय: ।
अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ॥ ८८ ॥

मोघाशा मोघाकर्माणो मोघज्ञाना विचेतस: ।
राक्षसीमासुरीं चैव प्रकृतिं मोहनी श्रिता: ॥ ८९ ॥

॥ ९० ॥

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिता: ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ ९० ॥

पिताऽसि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिक:
कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ९१ ॥

परं भूय: प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनय: सर्वे परां सिद्धिमितो गता: ॥ ९२ ॥

मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यम् ।
सम्भव: सर्वभूतानां ततो भवति भारत् ॥ ९३ ॥

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षर: सर्वाणि भुतानि कूतस्थोऽक्षर उच्यते ॥ ९४ ॥

उत्तम: पुरुषस्त्वन्य: परमात्मेन्युदाहृत: ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर: ॥ ९५ ॥

यस्मात् क्षरमतितोऽहमक्षरादपि चोत्तम: ।
अतोऽस्मि लोके वेदे च प्रथित: पुरुषोत्तम: ॥ ९६ ॥

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद् भजति मां सर्व भावेन भारत् ॥ ९७ ॥
(इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता: ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥)

इति गुह्यतमं शास्त्रामिदमुक्तं मयाऽनद्य ।
एतद् बुध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत् ॥ ९८ ॥

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरश: प्रोक्त: आसुरं पार्थ मे शृणु ॥ ९९ ॥

॥ १०० ॥

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
(अपरस्परसम्भूतं किमन्यत्कामहैतुकम ।
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धय: ।
प्रभवन्त्युग्रकर्माण: क्षयाय जगतोऽहिता: ॥)
ईश्वरोऽहमं भोगी सिद्धोऽहं बलवान् सुखी ॥ १०० ॥

मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयका: ।
तानहं द्विषत: क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १०१ ॥

आसुरीं योनिमापन्ना मूढा जन्मनिजन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधामां गतिम् ॥ १०२ ॥

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम् ॥ १०३ ॥

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ १०४ ॥

मन्मना भव मद्भक्तो मद्याजी मां नमस्करु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ १०५ ॥

पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् ।
सर्वेष्वेतेषु राजेन्द्र ज्ञानेष्वेतद् विशिष्यते ॥ १०६ ॥

ज्ञानेष्वेतेषु राजेन्द्र साङ्ख्यपाशुपतादिषु ।
यथायोगं यथान्यायं निष्ठा नारायणः परः ॥ १०७ ॥

पञ्चरात्रविदो मुख्या यथाक्रमपरा नृप ।
एकान्तभावोपगता वासुदेवं विशन्ति ते ॥ १०८ ॥

बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु ।
को ह्यत्र पुरुषश्रेष्ठस्तं भवान् वक्तुमर्हति ॥ १०९ ॥

॥ ११० ॥

वैशम्पायन उवाच -
नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह ।
बहूनां पुरुषाणां हि यथैका योनिरुच्यते ।
तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम् ॥ ११० ॥

आह ब्रह्मैतमेवार्थं महादेवाय पृच्छते ।
तस्यैकस्य ममत्वं हि स चैकः पुरुषो विराट् ॥ १११ ॥

अहं ब्रह्मा चाऽद्य ईशः प्रजानां
तस्माज्जातस्त्वं च मत्तः प्रसूतः ।
मत्तो जगत् स्थावरं जङ्गमं च
सर्वे वेदाः सरहस्याश्च पुत्र ॥ ११२ ॥

तथैव भीमवचनं धर्मजं प्रत्युदीरितम् |
ब्रह्मेशानादिभि: सर्वै: समेतैर्यद्गुणांशक: || ११३ ||

नावसाययितुं शक्यो व्याचक्षाणैश्च सर्वदा |
स एष भगवान् कृष्णो नैव केवलमानुष: || ११४ ||

यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसम्भव: |
वचनं चैव कृष्णस्य ज्येष्ठं कुन्तीसुतं प्रति || ११५ ||

रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रित: |
ब्रह्मा मामाश्रितो नित्यं नाहं किञ्चिदुपाश्रित: || ११६ ||

यत्याऽऽश्रितानि ज्योतींषि ज्योति:श्रेष्ठं दिवाकरम् |
एवं मुक्तगणा: सर्वे वासुदेवमुपाश्रिता: || ११७ ||

भविष्यत्पर्वगं चापि वचो व्यासास्य सादरम् |
वासुदेवस्य महिमा भारते निर्णयोदित: || ११८ ||

तदर्थास्तु कथा: सर्वा नान्यात्र्थं वैष्णवं यश: |
तत्प्रतीपं तु यद् दृश्येन्न तन्मम महीषितम् || ११९ ||

|| १२० ||

भाषासु त्रिविधास्तत्र मया वै सम्प्रदर्शिता: |
उक्तो यो महिमा विष्णो: स तूक्तो हि समाधिना || १२० ||

शैवदर्शनमालम्ब्य क्वचिच्छैवी कथोदिता |
समाधिभाषयोक्तं यत् तत् सर्वं ग्राह्यमेव हि || १२१ ||

अविरुद्धं समाधेस्तु दर्शनोक्तं च गृह्यते |
आद्यन्तयोर्विरुद्धं यद् दर्शनं तदुदाहृतम् || १२२ ||

दर्शनान्तरसिद्धं च गुह्यभाषाऽन्यथा भवेत् |
तस्माद् विष्णोर्हि महिमा भारतोक्तो यथार्त्थत: || १२३ ||

तस्याङ्गं प्रथमं वायु: प्रादुर्भावत्रयान्वित: |
प्रथमो हनुमान् नाम् द्वितीयो भीम एव च || १२४ ||

पुर्णप्रज्ञस्तृतीयस्तु भगवत्कार्यसाधक: |
त्रेताद्येषु युगेष्वेष संभूत: केशवाज्ञया || १२५ ||

एकैकशस्त्रिषु पृथक् द्वितीयाङ्गं सरस्वती |
शंरूपे तु रतेर्वायौ श्रीरित्येव च कीर्त्यते || १२६ ||

सैव च दौपदी नाम काली चन्द्रेति चोच्यते |
तृतीयाङ्गं हरे: शेष: प्रादुर्भावसमन्वित: || १२७ ||

प्रादुर्भावा नरश्चैव लक्ष्मणो बल एव च |
रुद्रात्मकत्वाच्छेषस्य शुको द्रौणिश्च तत्तनू || १२८ ||

इन्द्रे नरांशसम्पत्त्या पार्थोऽपीषत् तदात्मक: |
प्रद्युम्नाद्यास्ततो विष्णोरङ्गभूता: क्रमेण तु || १२९ ||

|| १३० ||

चरितं वैष्णवानां तद् विष्णूद्रेकाय कत्थ्यते |
तथा भागवतेऽप्युक्तं हनूमद्वचनं परम् || १३० ||

मर्त्यावतारस्त्विह मर्त्यशिक्षणं
रक्षोवधायैव न केवलं विभो: |
कुतोऽस्य हि स्यू रमत: स्व आत्मन्
सीताकृतानि व्यसनानीश्वरस्य || १३१ ||

न वै स आत्माऽऽत्मवतामधीश्वरो
भुङ्क्ते हि दु:खं भगवान् वासुदेव: |
न स्त्रीकृतं कश्मलमश्नुवीत न
लक्ष्मणं चापि जहाति कर्हिचित् || १३२ ||

यत्पादपङ्कजपरागनिषेवकाणां
दु:खानि सर्वाणि लयं प्रयान्ति ।
स ब्रह्मवन्द्यचरणो जनमोहनाय
स्त्रीसङ्गिनामिति रतिं प्रथयंश्चचार ॥ १३३ ॥

क्वचिच्छिवं क्वचिदृषीन् क्वचिद् देवान् क्वचिन्नरान् ।
नमत्यर्चयति स्तौति वरानर्थयतेऽपिच ॥ १३४ ॥

लिङ्गं प्रतिष्ठापयति वृणोत्यसुरतो वरान् ।
सर्वेश्वर: स्वतन्त्रोऽपि सर्वशक्तिश्च सर्वदा ॥ १३५ ॥

सर्वज्ञोऽपि विमोहाय जनानां पुरुषोत्तम: ।
तस्माद् यो महिमा विष्णो: सर्वशास्त्रोदित: स हि ॥ १३६ ॥

नान्यदित्येष शास्त्राणां निर्णय: समुदाहृत: ।
भारतार्थस्त्रिधा प्रोक्त: स्वरं भगवतैव हि ॥ १३७ ॥

मन्वादि केचिद् ब्रुवते ह्यास्तीकादि तथा परे ।
तथोपरिचराद्यन्ये भारातं परिचक्षते ॥ १३८ ॥

सकृष्णान् पाण्डवान् गृह्य योऽयमर्थ: प्रवर्तते ।
प्रातिलोम्यादिवैचित्र्यात्  तमास्तीकं प्रचक्षते ॥ १३९ ॥

॥ १४० ॥

धर्मो भक्त्यादिदशक: श्रुतादि: शीलवैनयौ ।
सब्रह्मकास्तु ते यत्र मन्वादिं तं विदुर्बुधा: ॥ १४० ॥

नारायणस्य नामानि सर्वाणि वचनानि तु ।
तत्सामर्थ्याभिधायीनि तमौपरिचरं विदु: ॥ १४१ ॥

भक्तिर्ज्ञानं सवैराग्यं प्रज्ञा मेधा धृति: स्थिति: ।
योग: प्राणो बलं चैव वृकोदर इति स्मृत: ॥ १४२ ॥

एतद्वशात्मको वायुस्तस्माद् भीमस्तदात्मकः ।
सर्वविद्या द्रौपदी तु यस्मात् सैव सरस्वती ॥ १४३ ॥

अज्ञानादिस्वरूपस्तु कलिर्दुर्योधनः स्मृतः ।
विपरीतं तु यज्ज्ञानं दुःशासन इतीरितः ॥ १४४ ॥

नस्तिक्यं शकुनिर्न्नाम सर्वदोषात्मकाः परे ।
धार्त्तराष्ट्रास्त्वहङ्कारो द्रौणी रुद्रात्मको यतः ॥ १४५ ॥

द्रोणाद्या इन्द्रियाण्येव पापान्यन्ये तु सैनिकाः ।
पाण्डवेयाश्च पुण्यानि तेषां विष्णुर्न्नियोजकः ॥ १४६ ॥

एवमध्यात्मनिष्ठं हि भारतं सर्वमुच्यते ।
दुर्विज्ञेयमतः सर्वैर्भारतं तु सुरैरपि ॥ १४७ ॥

स्वयं व्यासो हि तद् वेद ब्रह्मा वा तत्प्रसादतः ।
तथाऽपि विष्णुपरता भारते सारसङ्ग्रहः ॥ १४८ ॥

इत्यादिव्यासवाक्यैस्तु विष्णूत्कर्षोऽवगम्यते ।
वाय्वादीनां क्रमश्चैव तद्वाक्यैरेव चिन्त्यते ॥ १४९ ॥

॥ १५० ॥

वायुर्हि ब्रह्मतामेति तस्माद् ब्रह्मैव स स्मृतः ।
न ब्रह्मसदृशः कश्चिच्छिवादिषु कथञ्चन ॥ १५० ॥

ज्ञाने विरागे हरिभक्तिभावे
धृतिस्थितिप्राणबलेषु योगे ।
बुद्धौ च नान्यो हनुमत्समानः
पुमान् कदाचित् क्वच कश्चनैव ॥ १५१ ॥

बळित्था तद् वपुषे धायि दर्शतं
देवस्य भर्ग: सहसो यतो जनि ।
यदीमुप ह्वरते साधते मतिरृतस्य
धेना अनयन्त सस्रुत: ॥ १५२ ॥

पृक्षो वपु: पितुमान् नित्य आ शये
द्वितीयमा सप्तशिवासु मातृषु ।
तृतीयमस्य वृषभस्य दोहसे
दशप्रमतिं जनयन्त योषण: ॥ १५३ ॥

निर्यदीं बुध्नान्महिषस्य वर्पस
ईशानास: शवसा क्रन्त सूरय: ।
यदीमनु प्रदिवो मध्व आधवे
गुहा सन्तं मातरिश्वा मथायति ॥ १५४ ॥

प्र यत् पितु: परमान्नीयते पर्या
पृक्षुधो वीरुधो दंसु रोहति ।
उभा यदस्य जनुषं यदिन्वत
आदिद् यविष्ठो अभवद् घृणा शुचि: ॥ १५५ ॥
(आदिन्मातृराविशद् यास्वा शुचि-
रहिंस्यमान उर्विया वि वावृधे ।
अनु यत् पूर्व अरुहत् सनाजुवो
नि नव्यासीष्ववरासु धावते ॥)

अश्वमेध: क्रतुश्रेष्ठो ज्योति:श्रेष्ठो दिवाकर: ।
ब्राह्मणो द्विपदां श्रेष्ठो देवश्रेष्ठस्तु मारुत: ॥ १५६ ॥

बलमिन्द्रस्य गिरिशो गिरिशस्य बलं मरुत् ।
बलं तस्य हरि: साक्षान्न हरेर्बलमन्यत: ॥ १५७ ॥

वायुर्भीमो भीमनादो महौजा:
सर्वेषां च प्राणानां प्राणभूत: |
अनावृत्तिर्द्देहिनां देहपाते
तस्माद् वायुर्द्देवदेवो विशिष्ट: || १५८ ||

तत्वज्ञाने विष्णुभक्तौ
धैर्ये स्थैर्ये पराक्रमे |
वेगे च लाघवे चैव
प्रलापस्य च वर्जने || १५९ ||

|| १६० ||

भीमसेनसमो नास्ति सेनयोरुभयोरपि
पाण्डित्ये च पटुत्वे च शूरत्वे च बलेऽपि च || १६० ||

तथा युधिष्ठिरेणापि भीमं प्रति समीरितम् |
धर्मश्चार्थश्च कामश्च मोक्षश्चैव यशो ध्रुवम् || १६१ ||

त्वय्यायत्तमिदं सर्वं सर्वलोकस्य भारत |
विराटपर्वगं चापि वचो दुर्योधनस्य हि || १६२ ||

वीराणां शास्त्रविदुषां कृतिनां तत्वनिर्णये |
सत्वे बाहुबले धैर्ये प्राणे शरीरसम्भवे || १६३ ||

साम्प्रतं मानुषे लोके सदैत्यनरराक्षसे |
चत्वार: प्राणिनां श्रेष्ठा: सम्पूर्णबलपौरुषा: || १६४ ||

भीमश्च बलभद्रश्च मद्रराजश्च वीर्यवान् |
चतुर्थ: कीचकस्तेषां पञ्चमं नानुशुश्रुम: || १६५ ||

अन्योन्यानन्तरबला: क्रमादेव प्रकीर्त्तिता: |
वचनं वासुदेवस्य तथोद्योगगतं परम् || १६६ ||

यत् किञ्चाऽत्मनि कल्याणं सम्भावयसि पाण्डव |
सहस्रगुणमप्येतत् त्वयि सम्भावयाम्यगम् || १६७ ||

यादृशे च कुले जात: सर्वराजाभिपूजिते |
यादृशानि च कर्माणि भीम त्वमसि तादृश: || १६८ ||

अस्मिन् युद्धे भीमसेन त्वयि भार: समाहित: |
धूरर्जुनेन वोढव्या वोढव्य इतरो जन: |
उक्तं पुराणे ब्रह्माण्डे ब्रह्मणा नारदाय् च || १६९ ||

|| १७० ||

यस्या: प्रसादात् परमं विदन्ति
शेष: सुपर्णो गिरिश: सुरेन्द्र: |
माता च यैषां प्रथमैव भारती
सा द्रौपदी नाम बभूव भूमौ || १७० ||

या मारुताद् गर्भमधत्त पूर्वं
शेषं सुपर्णं गिरिशं सुरेन्द्रम् |
चतुर्मुखाभांश्चतुर: कुमारान्
सा द्रौपदी नाम बभूव भूमौ || १७१ ||

यस्याधिको बले नास्ति भीमसेनमृते क्वचित् |
न विज्ञाने नच ज्ञान एष राम: स लाङ्गली || १७२ ||

यस्य न प्रतियोद्धाऽस्ति भीममेकमृते क्वचित् |
अन्विष्यापि त्रिलोकेषु स एष मुसलायुध: || १७३ ||

तथा युधिष्ठिरेणैव भीमाय समुदीरितम् |
अनु ज्ञातो रौहिणेयात् त्वया चैवापराजित || १७४ ||

सर्वविद्यासु बीभत्सु: कृष्णेन च महात्मना |
अन्वेष रौहिणेयं च त्वां च भीमापराजितम् || १७५ ||

वीर्ये शौर्येऽपि वा नान्यस्तृतीयः फल्गुनादृते ।
तथैव द्रौपदीवाक्यं वासुदेवं प्रतीरितम् ॥ १७६ ॥

अधिज्यमपि यत् कर्तुं शक्यते नैव गाण्डिवम् ।
अन्यत्र भीमपार्थाभ्यां भवतश्च जनार्दन ॥ १७७ ॥

तथैवान्यत्र वचनं कृष्णाद्वैपायनेरितम् ।
द्वावेव पुरुषौ लोके वासुदेवादनन्तरौ ।
भीमास्तु प्रथमस्तत्र द्वितीयो द्रौणिरेव च ॥ १७८ ॥

अक्षयाविषुधी दिव्ये ध्वजो वानरलक्षणः ।
गाण्डीवं धनुषां श्रेष्ठं तेन दौणेर्वरोऽर्जुनः ॥ १७९ ॥

॥ १८० ॥

इत्याद्यनन्तवाक्यानि सन्त्येवार्थे विवक्षिते ।
कानिचिद् दर्शितान्यत्र दिङ्गात्रप्रतिपत्तये ॥ १८० ॥

तस्मादुक्तक्रमेणैव पुरुषोत्तमता हरेः ।
अनौपचारिकी सिद्धा ब्रह्मता च विनिर्णयात् ॥ १८१ ॥

पूर्णप्रज्ञकृतेयं सङ्क्षेपादुद्धृतिः सुवाक्यानाम् ।
श्रीमद्भारतगानां विष्णोः पूर्णत्वनिर्णयायैव ॥ १८२ ॥

स प्रीयतां परतमः परमादनन्तः
सन्तारकः सततसंसृतिदुस्तरार्णात् ।
यत्पादपद्ममकरन्दजुषो हि पार्थाः
स्वाराज्यमापुभयत्र सदा विनोदात् ॥ १८३ ॥

*इति श्रीमदानन्दतीर्थभगवत्पादकृते*

*श्रीमहाभारततात्पर्यनिर्णये*

*वाक्योद्धारो नाम*

*द्वितीयोऽध्याय:*

--- ০০০ ---

|| श्री ||

श्रीमदानन्दतीर्थभगवत्पादविरचित:

# || श्रीमहाभारततात्पर्यनिर्णय: ||

## अथ तृतीयोऽध्याय:

*[ सर्गानुसर्ग - लय - प्रादुर्भाव – निर्णय: ]*

ॐ || जयत्यजोऽखण्डगुणोरुमण्डल:
सदोदितो ज्ञानमरीचिमाली |
स्वभक्तहार्द्दोच्चतमोनिहन्ता
व्यासावतारो हरिरात्मभास्कर: || १ ||

जयत्यजोऽक्षीणसुखात्मबिम्ब:
स्वैश्वर्यकान्तिप्रतत: सदोदित: |
स्वभक्तसन्तापदुरिष्टहन्ता
रामावतारो हरिरीशचन्द्रमा || २ ||

जयत्यसङ्ख्योरुबलाम्बुपूरो
गुणोच्चरत्नाकर आत्मवैभव: |
सदा सदात्मज्ञनदीभिराप्य:
कृष्णावतारो हरिरेकसागर: || ३ ||

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् |
देवीं सरस्वतीं व्यासं ततो जयमुदीरये || ४ ||

जयो नामेतिहासोऽयं कृष्णद्वैपायनेरित: |
वायुर्न्नरोत्तमो नाम देवीति श्रीरुदीरिता || ५ ||

नारायणो व्यास इति वाच्यवक्तृस्वरूपक: |
एक: स भगवानुक्त: साधकेशो नरोत्तम: || ६ ||

उपसाधको नरश्चोक्तो देवी भाग्यात्मिका नृणाम् |
सरस्वती वाक्यरूपा तस्मान्नम्या हि तेऽखिला: |
कृष्णौ सत्या भीमपार्थौ कृष्णेत्युक्ता हि भारते || ७ ||

सर्वस्य निर्णयसुवाक्यसमुद्धृती तु
स्वद्ध्याययोर्हरिपदस्मरणेन कृत्वा |
आनन्दतीर्थवरनामवती तृतीया
भौमी तनुर्मरुत आह कथा: परस्य || ८ ||

व्यूढश्चतुर्द्धा भगवान् स एको
मायां श्रियं सृष्टिविधित्सयाऽऽर |
रूपेण पूर्वेण स वासुदेवनाम्ना
विरिञ्चं सुषुवे च साऽत: || ९ ||

|| १० ||

सङ्कर्षणाच्चापि जयातनूजो
बभूव साक्षाद् बलसंविदात्मा |
वायुर्य एवाथ विरिञ्चनामा
भविष्य आद्यो न परस्ततो हि || १० ||

सूत्रं स वायु: पुरुषो विरिञ्च:
प्रद्युम्नतश्चाथ कृतौ स्त्रियौ द्वे |
प्रजज्ञतुर्यमळे तत्र पूर्वा
प्रधानसञ्ज्ञा प्रकृतिर्ज्जनित्री || ११ ||

श्रद्धा द्वितीयाऽथ तयोश्च योगो
बभूव पुंसैव च सूत्रनाम्ना |
हरेर्न्नियोगादथ सम्प्रसूतौ
शेष: सुपर्णश्च तयो: सहैव || १२ ||

शेषस्तयोरेव हि जीवनामा
कालात्मक: सोऽथ सुपर्ण आसीत् |
तौ वाहनं शयनं चैव विष्णो:
काला जयाद्याश्च तत: प्रसूता: || १३ ||

काला जयाद्या अपि विष्णुपार्षदा
यस्मादण्डात् परतः सम्प्रसूताः |
नीचाः सुरेभ्यस्तत एव तेऽखिला
विष्वक्सेनो वायुजः खेन तुल्यः || १४ ||

व्यूहात् तृतीयात् पुनरेव विष्णोः
देवांश्चतुर्वर्णगतान् समस्तान् |
सङ्गृह्य बीजात्मतयाऽनिरुद्धो
न्यधत्त शान्त्यां त्रिगुणात्मिकायाम् || १५ ||

ततो महत्तत्वतनुर्विरिञ्चः
स्थूलात्मनैवाजनि वाक् च देवी |
तस्यामहङ्कारतनु स रुद्रं
ससर्ज बुद्धिं च तदर्द्धदेहाम् || १६ ||

बुद्ध्यामुमायां स शिवस्त्रिरूपो
मनश्च वैकारिकदेवसङ्घान् |
दशेन्द्रियाण्येव च तैजसानि
क्रमेण खादीन् विष्यैश्च सार्द्धम् || १७ ||

पुंसः प्रकृत्यां च पुनर्विरिञ्चा-
च्छिवोऽथ तस्मादखिलाः सुरेशाः |
जाताः सशक्राः पुनरेव सूत्रा-
च्छ्रद्धा सुतानाप सुरप्रवीरान् || १८ ||

शेषं शिवं चेन्द्रमथेन्द्रतश्च
सर्वे सुरा यज्ञगणाश्च जाताः |
पुनश्च माया त्रिविधा
बभूव सत्वादिरूपैरथ वासुदेवात् || १९ ||

|| २० ||

सत्वात्मिकायां स बभूव तस्मात्
स विष्णुनामैव निरन्तरोऽपि |
रजस्तनौ चैव विरिञ्च आसीत्
तमस्तनौ शर्व इति त्रयोऽस्मात् || २० ||

एते हि देवाः पुनरण्डसृष्टा-
वशक्नुवन्तो हरिमेत्य तुष्टुवुः |
त्वं नो जगच्चित्रविचित्रसर्ग-
निस्सीमशक्तिः कुरु सन्निकेतम् || २१ ||

इति स्तुतस्तैः पुरुषोत्तमोऽसौ
स विष्णुनामा श्रियमाप सृष्टये |
सुषाव सैवाण्डमधोक्षजस्य
शुष्मं हिरण्यात्मकम्बुमद्ध्ये || २२ ||

तस्मिन् प्रविष्टा हरिणैव सार्द्धं
सर्वे सुरास्तस्य बभूव नाभेः |
लोकात्मकं पद्ममुष्य मद्ध्ये
पुनर्विरिञ्चोऽजनि सद्गुणात्मा || २३ ||

तस्मात् पुनः सर्वसुराः प्रसूतास्ते
जानमाना अपि निर्णयाय |
निसृत्य कायादुत पद्मयोनेः
सम्प्राविशन् क्रमशो मारुतान्ताः || २४ ||

पपात वायोर्गमनाच्छरीरं
तस्यैव चाऽवेशात् उत्थितं पुनः |
तस्मात् स एको विबुधप्रधान
इत्याश्रिता देवगणास्तमेव || २५ ||

हरेर्विरिञ्चस्य च मद्ध्यसंस्थिते-
स्तदन्यदेवाधिपति: स मारुत: |
ततो विरिञ्चो भुवनानि सप्त
ससप्तकान्याशु चकार सोऽब्जात् || २६ ||

तस्माच्च देवा ऋषय: पुनश्च
वैकारिकाद्या: सशिवा बभूवु: |
अग्रे शिवोऽहम्भव एव बुद्धे-
रुमा मनोजौ सह शक्रकामौ || २७ ||

गुरुर्मनुर्द्दक्ष उतानिरुद्ध:
सहैव पश्चान्मनस: प्रसुता: |
चक्षु:श्रुतिभ्यां स्पर्शात् सहैव
रवि: शशी धर्म इमे प्रसूता: || २८ ||

जिह्वाँभवो वारिपतिर्न्नसोश्च
नासत्यदस्रौ क्रमश: प्रसूता: |
तत: सनाद्याश्च मरीचिमुख्या
देवाश्च सर्वे क्रमश: प्रसूता: || २९ ||

|| ३० ||

ततोऽसुराद्या ऋषयओ मनुष्या
जगद् विचित्रं च विरिञ्चितोऽभूत् |
उत्तक्रमात् पूर्वभवस्तु योय:
श्रेष्ठ: सस ह्यासुरकानृते च || ३० ||

पूर्वस्तु पश्चात् पुनरेव जातो
नाश्रेष्ठतामेति कथञ्चिदस्य |
गुणास्तु कालात् पितृमातृदोषात्
स्वकर्मतो वाऽभिभवं प्रयान्ति || ३१ ||

लयो भवेद् व्युक्तक्रमतो हि तेषां
ततो हरि: प्रळये श्रीसहाय: |
शेते निजानन्दममन्दसान्द्र
सन्दोहमेकोऽनुभवन्ननन्त: || ३२ ||

अनन्तशीर्षास्यकरोरुपाद:
सोऽनन्तमूर्त्ति: स्वगुणाननन्तान् |
अनन्तशक्ति: परिपूर्नभोगो
भुञ्जन्नजस्रं निजरूप आस्ते || ३३ ||

एवं पुन: सृजते सर्वमेतद-
नाद्यनन्तो हि जगत्प्रवाह: |
नित्यश्च जीवा: प्रकृतिश्च नित्या
कालश्च नित्य: किमु देवदेव: || ३४ ||

यथा समुद्रात् सरित: प्रजाता:
पुनस्तमेव प्रविशन्ति शश्वत् |
एवं हरेर्न्नित्यजगत्प्रवाह-
स्तमेव चासौ प्रविशत्यजस्रम् || ३५ ||

एवं विदुर्ये परमामनन्ताम-
जस्य शक्तिं पुरुषोत्तमस्य |
तस्य प्रसादादथ दग्धदोषा-
स्तमाप्नुवन्त्याशु परं सुरेशम् || ३६ ||

देवानिमान् मुक्तसमस्तदोषान्
स्वसन्निधाने विनिवेश्य देव: |
पुनस्तदन्यानधिकारयोग्यां-
स्तत्तद्गणानेव पदे नियुङ्क्ते || ३७ ||

पुनश्च मारीचत एव देवा
जाता आदित्यामसुराश्च दित्याम् ।
गावो मृगा: पक्ष्युरगादिसत्वा
दाक्षायणीष्वेव समस्तशोऽपि ॥ ३८ ॥

तत: स मग्नामलयो लयोदधौ
महीं विलोक्याऽशु हरिर्वराह: ।
भूत्वा विरिञ्चार्थ इमां सशैला-
मुद्धृत्य वारामुपरि न्यधात् स्थिरम् ॥ ३९ ॥

॥ ४० ॥

अथाब्जनाभप्रतिहारपालौ
शापात् त्रिशो भूमितळेऽभिजातौ ।
दित्यां हिरण्यावथ राक्षसौ च
पैतृष्वसेयौ च हरे: परस्तात् ॥ ४० ॥

हतो हिरण्याक्ष: उदारविक्रमो
दिते: सुतो योऽवरज: सुरार्थे ।
धात्राऽर्थितेनैव वराहरूपिणा
धरोद्धृतौ पूर्वहतोऽब्जजोद्भव: ॥ ४१ ॥

अथो विधातुर्मुखतो विनि:सृतान्
वेदान् हयास्यो जगृहेऽसुरेन्द्र: ।
निहत्य तं मत्स्यवपुर्ज्जगोप
मनुं मुनींस्तांश्च ददौ विधातु: ॥ ४२ ॥

मन्वन्तरप्रळये मत्स्यरूपो
विद्यामदान्मनवे देवदेव: ।
वैवस्वतायोत्तमसंविदात्मा
विष्णो: स्वरूपप्रतिपत्तिरूपाम् ॥ ४३ ॥

अथो दितेर्ज्येष्ठसुतेन शश्वत्
प्रपीडता ब्रह्मवरात् सुरेशा: |
हरिं विरिञ्चेन सहोपजग्मु-
र्दौरात्म्यमस्यापि शशंसुरस्मै || ४४ ||

अभिष्टुतस्तैर्हरिरुग्रवीर्यो
नृसिंहरूपेण स आविरासीत् |
हत्वा हिरण्यं च सुताय तस्य
दत्वाऽभयं देवगणानतोषयत् || ४५ ||

सुरासुराणामुदधिं विमथ्नतां
दधार पृष्ठेन गिरिं स मन्दरम् |
वरप्रदानादपरैरधार्यं
हरस्य कूर्मो बृहदण्डवोढा || ४६ ||

वरादजेयत्वमवाप दैत्यराट्
चतुर्मुखस्यैव बलिर्यदा तदा |
अजायतेन्द्रावरजोऽदिते: सुतो
महानजोऽप्यब्जभवादिसंस्तुत: || ४७ ||

स वामनात्माऽसुरभूतोऽध्वरं
जगाम गां सन्नमयन् पदेपदे |
जहार चास्माच्छलतस्त्रिविष्टपं
त्रिभि: क्रमैस्तच्च ददौ निजाग्रजे || ४८ ||

पितामहेनास्य पुरा हि याचितो
बले: कृते केशव आह यद् वच: |
नायाच्ञयाऽहं प्रतिहन्मि तं बलिं
शुभाननेत्येव ततोऽभ्ययाचत || ४९ ||

|| ५० ||

बभूविरे चन्द्रललामतो वरात्
पुरा ह्यजेया असुरा धरातळे ।
तैरर्द्दिता वासवनायका: सुरा:
पुरो निधायाब्जजमस्तुवन् हरिम् ॥ ५० ॥

विरिञ्चसृष्टैर्न्नितरामवद्ध्यौ
वराद् विधातुर्द्दितिजौ हिरण्यकौ ।
तथा हयग्रीव उदारविक्रम-
स्त्वया हता ब्रह्मपुरातनेन ॥ ५१ ॥

स चासुरान् रुद्रवरादवद्ध्या-
निमान् समस्तैरपि देवदेव ।
नि:सीमशक्त्यैव निहत्य सर्वान्
हृदम्बुजे नो नेवसाथ शश्वत् ॥ ५२ ॥

इत्यादरोक्तस्त्रिदशैरजेय:
स शार्ङ्गधन्वाऽथ भृगूद्वहोऽभूत् ।
रामो निहत्यासुरपूगमुग्रं
नदाननादिर्व्विदधेऽसृजैव् ॥ ५३ ॥

तत:पुलस्त्यस्य कुले प्रसूतौ
तावादिदैत्यौ जगदेकशत्रू ।
परैरवद्ध्यौ वरत: पुरा हरे:
सुरैरजेयौ च वराद् विधातु: ॥ ५४ ॥

सर्वैरजेय: स च कुम्भकर्ण:
पुरातने जन्मनि धातुरेव ।
वरान्नरादीनृत एव रावण-
स्तदातनात् तौ त्रिदशानबाधताम् ॥ ५५ ॥

तदाऽब्जजं शूलिनमेव चाग्रतो
निधाय देवा: पुरुहूतपूर्वका: ।
पयोम्बुदौ भोगिपभोगशायिनं
समेत्य योग्यां स्तुतिमभ्ययोजयन् ॥ ५६ ॥

त्वमेक ईश: परम: स्वतन्त्र-
स्त्वमादिरन्तो जगतो नियोक्ता ।
त्वदाज्ञयैवाखिलमम्बुजोद्भवा
वितेनिरेऽग्र्याश्चरमाश्च येऽन्ये ॥ ५७ ॥

मनुष्यमानात् त्रिशतं सषष्टिकं
दिवौकसामेकमुशन्ति वत्सरम् ।
द्विषट्सहस्रैरपि तैश्चतुर्युगं
त्रेतादिभि: पादश एव हीनै: ॥ ५८ ॥

सहस्रवृत्तं तदह: स्वयम्भुवो
निशा च तन्मानमितं शरच्छतम् ।
त्वदाज्ञया स्वाननुभूय भोगा-
नुपैति सोऽपि त्वरितस्त्वदन्तिकम् ॥ ५९ ॥

॥ ६० ॥

त्वया पुरा कर्णपुटाद् विनिर्मितौ
महासुरौ तौ मधुकैटभाख्यौ ।
प्रभञ्जनावेशवशात् तवाऽज्ञया
बलोद्धतावाशु जले व्यवर्द्धताम् ॥ ६० ॥

त्वदाज्ञया ब्रह्मवरादवद्ध्यौ
चिक्रीडिषासम्भवया मुखोद्गतान् ।
स्वयम्भुवो वेदगणानहार्षतां
तदाऽभवस्त्वं हयशीर्ष ईश्वर: ॥ ६१ ॥

आहृत्य वेदानखिलान् प्रदाय
स्वयम्भुवे तौ च जघन्थ दस्यू ।
निष्पीड्य तावूरुतळे कराभ्यां
तन्मेदसैवाऽशु चकर्थ मेदिनीम् ॥ ६२ ॥

एवं सुराणां च निसर्गजं बलं
तथाऽसुराणां वरदानसम्भवम् ।
वशे तवैतद् द्वयमप्यतो वयं
निवेदयाम: पितुरेव तेऽखिलम् ॥ ६३ ॥

इमौ च रक्षोधिपती वरोद्धतौ
जहि स्ववीर्येण नृषु प्रभूत: ।
इतीरिते तैरखिलै: सुरेश्वरै:
बभूव रामो जतीपति: प्रभु: ॥ ६४ ॥

स कश्यपस्यादितिगर्भजन्मनो
विवस्वतस्तन्तुभवस्य भूभृत: ।
गृहे दशस्यन्दननामिनोऽभूत्
कौसल्यकानाम्नि तदर्थिनेष्ट: ॥ ६५ ॥

तदाज्ञया देवगणा बभूविरे
पुरैव पश्चादपि तस्य भूम्न: ।
निषेवणायोरुगुणस्य वानरे-
ष्वथो नरेष्वेव च पश्चिमोद्भवा: ॥ ६६ ॥

स देवतानां प्रथमो गुणाधिको
बभूव नाम्ना हनुमान् प्रभञ्जन: ।
स्वसम्भव: केसरिनो गृहे प्रभु:
बभूव वाली स्वत एव वासव: ॥ ६७ ॥

सुग्रीव आसीत् परमेष्ठितेजसा
युतो रवि: स्वात्मत एव जाम्बवान् |
य एव पूर्वं परमेष्ठिवक्षस-
स्त्वगुद्भवो धर्म इहाऽस्यतोऽभवत् || ६८ ||

य एव सूर्यात् पुनरेव सञ्ज्ञया
नाम्ना यमो दक्षिणदिक्प आसीत् |
स जाम्बवान् दैवतकार्यदर्शिना
पुरैव सृष्टो मुखत: स्वयम्भुवा || ६९ ||

|| ७० ||

ब्रह्मोद्भव: सोम उतास्य सूनो:
अत्रेरभूत् सोऽङ्गद एव जात: |
बृहस्पतिस्तार उतो शची च
शक्रस्य भार्यैव बभूव तारा || ७० ||

बृहस्पतिर्ब्रह्मसुतोऽपि पूर्वं
सहैव शच्या मनसोऽभिजात: |
ब्रह्मोद्भवस्याङ्गिरस: सुतोऽभू-
न्मारीचजस्यैव शची पुलोम्न: || ७१ ||

स एव शच्या सह वानरोऽभूत्
स्वसम्भवो देवगुरुर्बृहस्पति: |
अभूत् सुषेणो वरुणोऽश्विनौ च
बभूवतुस्तौ विविदश्च मैन्द: || ७२ ||

ब्रह्मोद्भवौ तौ पुनरेव सूर्याद्
बभूवतुस्तत्र कनीयसस्तु |
आवेश ऐन्द्रो वरदानतोऽभूत्
ततो बलीयान् विविदो हि मैन्दात् || ७३ ||

नीलोऽग्निरासीत् कमलोद्भवोत्थः
कामः पुनः श्रीरमणाद् रमायाम् ।
प्रद्युम्ननामाऽभवदेवमीशात्
स स्कन्दतामाप स चक्रतां च ॥ ७४ ॥

पूर्वं हरेश्चक्रमभूद्धि दुर्गा
तमःस्थिता श्रीरिति यां वदन्ति ।
सत्वात्मिका शङ्खमथो रजःस्था
भूर्न्नामिका पद्मभूद्धरेर्हि ॥ ७५ ॥

गदा तु वायुर्बलसंविदात्मा
शार्ङ्गश्च विद्येति रमैव खड्गः ।
दुर्गात्मिका सैव च चर्मनाम्नी
पञ्चात्मको मारुत एव बाणाः ॥ ७६ ॥

एवं स्थितेष्वेव पुरातनेषु
वराद् रथाङ्गत्वमवाप कामः ।
तत्सूनुतामाप च सोऽनिरुद्धो
ब्रह्मोद्भवः शङ्खतनुः पुमात्मा ॥ ७७ ॥

तावेव जातौ भरतश्च नाम्ना
शत्रुघ्न इत्येव च रामतोऽनु ।
पूर्वं सुमित्रातनयश्च शेषः
स लक्ष्मणो नाम रघूत्तमादनु ॥ ७८ ॥

कौसल्यकापुत्र उरुक्रमोऽसा-
वेकस्तथैको भरतस्य मातुः ।
उभौ सुमित्रातनयौ नृपस्य
चत्वार एते ह्यमरोत्तमाः सुता ॥ ७९ ॥

|| ८० ||

सङ्कर्षणाद्यैस्त्रिभिरेव रूपै-
राविष्ट आसीत् त्रिषु तेषु विष्णु: |
इन्द्रोऽङ्गदे चैव ततोऽङ्गदो हि
बली नितान्तं स बभूव शश्वत् || ८० ||

येऽन्ये च भूपा: कृतवीर्यजाद्या
बलाधिका: सन्ति सहस्रशोऽपि |
सर्वे हरे: सन्निधिभावयुक्ता
धर्मप्रधानाश्च गुणप्रधाना: || ८१ ||

स्वयं रमा सीरत एव जाता
सीतेति रामार्थमनूपमा या |
विदेहराजस्य हि यज्ञभूमौ
सुतेति तस्यैव ततस्तु साऽभूत् || ८२ ||

इत्यादिकल्पोत्थित एष सर्गो
मया समस्तागमनिर्णयात्मक: |
सहानुसर्ग: कथितोऽत्र पूर्वो
योयो गुणैर्न्नित्यमसौ वरो हि || ८३ ||

पाश्चात्त्यकल्पेष्वपि सर्गभेदा:
श्रुतौ पुराणेष्वपिचान्यथोक्ता: |
नोत्कर्षहेतु: प्रथमत्वमेषु
विशेषवाक्यैरवगम्यमेतत् || ८४ ||

*इति श्रीमदानन्दतीर्थभगवत्पादविरचिते*

*श्रीमहाभारततात्पर्यनिर्णये*

*सर्गानुसर्गलयप्रादुर्भावनिर्णयो नाम*

*तृतीयोऽध्याय:*

--- ००० ---

## अथ चतुर्थोऽध्याय:

*[श्रीरामावतारे अयोध्याप्रवेश:]*

ॐ || अथाभ्यवर्धंश्चतुरा: कुमारा
नृपस्य गेहे पुरुषोत्तमाद्या: |
नित्यप्रवृद्धस्य च तस्य वृद्धि:
अपेक्ष्य लोकस्य हि मन्ददृष्टिम् || १ ||

निरीक्ष्य नित्यं चतुर: कुमारान्
पिता मुदं सन्ततमाप चोच्चम् |
विशेषतो राममुखेन्दुबिम्बम्
अवेक्ष्य राजा कृतकृत्य आसीत् || २ ||

तन्मातर: पौरजना अमात्या
अन्त:पुरा वैषयिकाश्च सर्वे |
अवेक्षमाणा: परमं पुमांसं
स्वानन्दतृप्ता इव सम्बभूवु: || ३ ||

तत: सुवंशे शशिन: प्रसूतो
गाधीति शक्रस्तनुजोऽस्य चाऽसीत् |
वरेण विप्रत्वमवाप योऽसौ
विश्वस्य मित्रं स इहाऽजगाम || ४ ||

तेनार्थितो यज्ञरिरक्षयैव
कृच्छ्रेण पित्राऽस्य भयाद् विसृष्ट: |
जगाम राम: सह लक्ष्मणेन
सिद्धाश्रमं सिद्धजनाभिवन्द्य: || ५ ||

अनुग्रहार्थं स ऋषेरवाप
सलक्ष्मणोऽस्त्रं मुनिनो हि केवलम् ।
ववन्दिरे ब्रह्ममुखा: सुरेशा:
तमस्त्ररूपा: प्रकटा: समेत्य ॥ ६ ॥

अथो जघानाऽशु शरेण ताटकां
वराद् विधातुस्तदनन्यवद्ध्याम् ।
ररक्ष यज्ञं च मुनेर्न्निहत्य
सुबाहुमीशानगिरा विमृत्युम् ॥ ७ ॥

शरेण मारीचमथार्णवेऽक्षिपद्
वचो विरिञ्चस्य तु मानयान: ।
अवद्ध्यता तेन हि तस्य दत्ता
जघान चान्यान् रजनीचरानथ ॥ ८ ॥

तदा विदेहेन सुतास्वयंवरो
विघोषितो दिक्षु विदिक्षु सर्वश: ।
निधार्य तद् गाधिसुतानुयायी
ययौ विदेहाननुजानुयात: ॥ ९ ॥

॥ १० ॥

अथो अहल्यां पतिनाऽभिशप्तां
प्रधर्षणादिन्द्रकृताच्छिलीकृताम् ।
स्वदर्शनान्मानुषतामुपेतां
सुयोजयामास स गौतमेन ॥ १० ॥

बलं स्वभक्तेरधिकं प्रकाशयन्
अनुग्रहं च त्रिदशेष्वतुल्यम् ।
अनयभक्तां च सुरेशकाङ्क्षया
विधाय नारीं प्रययौ तयाऽर्चित: ॥ ११ ॥

श्यामावदाते जगदेकसारे
स्वनन्तचन्द्राधिककान्तिकान्ते |
सहानुजे कार्मुकबाणपाणौ
पुरीं प्रविष्टे तुतुषुर्विदेहजा: || १२ ||

पपुर्न्नितान्तं सरसाक्षिभृङ्गैः
वराननाब्जं पुरुषोत्तमस्य |
विदेहनारीनरवर्यसङ्घा
यथा महापूरुषिकास्तदङ्घ्रिम् || १३ ||

तथा विदेह: प्रतिलभ्य रामं
सहस्रनेत्रावरजं गविष्ठम् |
समर्चयामास सहानुजं तम्
ऋषिं च साक्षाज्वलनप्रकाशम् || १४ ||

मेने च जामातरमात्मकन्या
गुणोचितं रूपनवावतारम् |
उवाच चास्मै ऋषिरूग्रतेजा:
गुरुष्व जामातरमेनमाश्विति || १५ ||

स आह चैनं परमं वचस्ते
करोमि नात्रास्ति विचारणा मे |
शृणुष्व मेऽथापि यथा प्रतिज्ञा
सुताप्रदानाय कृता पुरस्तात् || १६ ||

तपो मया चीर्णमुमापते: पुरा
वरायुधावाप्तिधृतेन चेतसा |
स मे ददौ दिव्यमिदं धनुस्तदा
कथञ्चनाचाल्यमृते पिनाकिनम् || १७ ||

न देवदैत्योरगदेवजायका
अलं धनुश्चालयितुं सवासवा: ।
कुतो नरास्तद्वरतो हि किङ्करा:
सहानसैवात्र कृषन्ति कृच्छ्रत: ॥ १८ ॥

अधार्यमेतद् धनुराप्य शङ्करात्
अहं नृणां वीर्यपरीक्षणे धृत: ।
सुतार्थमेतां चकर प्रतिज्ञां
ददमि कन्यां य इदं हि पूरयेत् ॥ १९ ॥

॥ २० ॥

इतीरितां मे गिरमभ्यवेत्य
दिते:सुता दानवयक्षराक्षसा: ।
समेत्य भूपाश्च समीपमाशु
प्रगृह्य तच्चालयितुं न शेकु: ॥ २० ॥

संस्विन्नगात्रा: परिवृत्तनेत्रा
दशाननाद्या: पतिता विमूर्च्छिता: ।
तथाऽपि मां धर्षयितुं न शेकु:
सुताकृते ते वचनात् स्वयम्भुव: ॥ २१ ॥

पुरा हि मेऽदात् प्रभुरब्जजो वरं
प्रसादितो मे तपसा कथञ्चन ।
बलान्न ते कश्चिदुपैति कन्यकां
तदिच्छुभिस्ते नच धर्षणेति ॥ २२ ॥

ततस्तु ते नष्टमदा इतो गता:
समस्तशो ह्यस्तन एव पार्थिवा: ।
ततो ममायं प्रतिपूर्य मानसं
वृणोतु कन्यामयमेव मेऽर्थित: ॥ २३ ॥

तथेति चोक्ते मुनिना स किङ्करै:
अनन्तभोगोपममाश्वथाऽनयत् ।
समीक्ष्य तद् वामकरेण राघव:
सलीलमुद्धृत्य हसन्नपूरयत् ॥ २४ ॥

विकृष्यमाणं तदनन्तराधसा
परेण नि:सीमबलेन लीलया ।
अभज्यतासह्यममुष्य तद् बलं
प्रसोढुमीशं कुत एव तद् भवेत् ॥ २५ ॥

स मद्ध्यतस्तत् प्रविभज्य लीलया
यथेक्षुदण्डं शतमन्युकुञ्जर: ।
विलोकयन् वक्त्रमृषेरवस्थित:
सलक्ष्मण: पूर्णतनुर्यथा शशी ॥ २६ ॥

तमब्जनेत्रं पृथुतुङ्गवक्षसं
श्यामावदातं चलकुण्डलोज्वलम् ।
शशक्षतोत्थोपमचन्दनोक्षितं
ददर्श विद्युद्वसनं नृपात्मजा ॥ २७ ॥

अथो कराभ्यां प्रतिगृह्य मालाम्
अम्लानपद्मां जलजायताक्षी ।
उपेत्य मन्दं ललितै: पदैस्तां
तदंस आसज्य च पार्श्वतोऽभवत् ॥ २८ ॥

तत: प्रमोदो नितरां जनानां
विदेहपुर्यामभवत् समन्तात् ।
रामं समालोक्य नरेन्द्रपुत्र्या
समेतमानन्दनिधिं परेशम् ॥ २९ ॥


Sri Chaturvedi Samshodhana Pratisthanam (www.chaturvedivyasa.org)

॥ ३० ॥

लक्ष्म्या समेते प्रकटं रमेशे
सम्प्रेषयामास तदाऽऽशु पित्रे ।
विदेहराजो दशदिग्रथाय
स तन्निशम्याऽशु तुतोष भूमिप: ॥ ३० ॥

अथाऽत्मजाभ्यां सहित: सभार्य्यो
ययौ गजस्यन्दनपत्तियुक्तया ।
स्वसेनयाऽग्रे प्रणिधाय धातृजं
वसिष्ठमाश्वेव स यत्र मैथिल: ॥ ३१ ॥

स मैथिलेनातितरां समर्च्चितो
विवाहयामास सुतं मुदम्भर: ।
पुरोहितो गाधिसुतानुमोदितो
जुहाव वह्निं विधिना वसिष्ठ: ॥ ३२ ॥

'तदा विमानावलिभिर्न्नभस्तळं
दिदृक्षतां सङ्कुलमास नाकिनाम् ।
सुरानका दुन्दुभयो विनेदिरे'
जगुश्च गन्धर्ववरा: सहस्रश: ॥ ३३ ॥

विजानमाना जगतां हि मातरं
पुराऽर्त्थितुं नाऽययुरत्र देवता: ।
तदा तु रामं रमया युतं प्रभुं
दिदृक्षवश्चक्रुरलं नभस्तळम् ॥ ३४ ॥

यथा पुरा सागरजास्वयंबरे
सुमानसानामभवत् समागम: ।
तथा ह्यभूत् सर्वदिवौकसां तदा
तथा मुनीनां सहभूभृतां भुवि ॥ ३५ ॥


Sri Chaturvedi Samshodhana Pratisthanam (www.chaturvedivyasa.org)

प्रगृह्य पाणिं च नृपात्मजाया
रराज राजीवसमाननेत्रः
यथा पुरा सागरजासमेतः
सुरासुराणाममृताब्धिमन्थने || ३६ ||

स्वलङ्कृतास्तत्र विचेरुरङ्गना
विदेहराजस्य च या हि योषितः |
मुदा समेतं रमया रमापतिं
विलोक्य रामाय ददौ धनं नृपः || ३७ ||

प्रियाणि वस्त्राणि रथान् सकुञ्जरान्
परार्ध्यरत्नान्यखिलस्य चेशितुः |
ददौ च कन्यात्रयमुत्तमं मुदा
तदा स रामावरजेभ्य एव || ३८ ||

महोतसवं तं त्वनुभूय देवता
नराश्च सर्वे प्रययुर्यथागतम् |
पिता च रामस्य सुतैः समन्वितो
ययावयोद्ध्यां स्वपुरीं मुदा ततः || ३९ ||

|| ४० ||

तदन्तरे सोऽथ ददर्श भार्गवं
सहस्रलक्षामितभानुदीधितिम् |
विभासमानं निजरश्मिमण्डले
धनुर्द्धरं दीप्तपरश्वधायुधम् || ४० ||

अजानतां राघवमादिपूरुषं
समागतं ज्ञापयितुं निदर्शनैः |
समाह्वयन्तं रघुपं स्पृधेव
नृपो ययाचे प्रणिपत्य भीतः || ४१ ||

न मे सुतं हन्तुमिहार्हसि प्रभो
वयोगतस्येत्युदित: स भार्गव: ।
सुतत्रयं ते प्रददामि राघवं
रणे स्थितं द्रष्टुमिहाऽगतोऽस्म्यहम् ॥ ४२ ॥

स इत्थमुक्त्वा नृपतिं रघूत्तमं
भृगूत्तम: प्राह निजां तनुं हरि: ।
अभेदमज्ञेष्वभिदर्शयन् परं
पुरातनोऽहं हरिरेष इत्यपि ॥ ४३ ॥

शृणुष्व राम त्वमिहोदितं मया
धनुर्द्वयं पूर्वमभून्महाद्भुतम् ।
उमापतिस्त्वेकमधारयत्
ततो रमापतिश्चापरमुत्तमोत्तमम् ॥ ४४ ॥

तदा तु लोकस्य निदर्शनार्थिभि:
समर्थितौ तौ हरिशङ्करौ सुरै: ।
रणस्थितौ वां प्रसमीक्षितुं वयं
समर्थयामोऽत्र निदर्शनार्थिन: ॥ ४५ ॥

ततो हि युद्धाय रमेशशङ्करौ
व्यवस्थितौ ते धनुषी प्रगृह्य ।
यतोऽन्तरस्यैष नियामको हरि:
ततो हरोऽग्रेऽस्य शिलोपमोऽभवत् ॥ ४६ ॥

शशाक नैवाथ यदाऽभिवीक्षितुं
प्रस्पन्दितुं वा कुत एव योद्धुम् ।
शिवस्तदा देवगणा: समस्ता:
शशंसुरुच्चैर्जगतो हरेर्बलम् ॥ ४७ ॥

यदीरणेनैव विनैष शङ्कर:
शशाक न प्रश्वसितुं च केवलम् |
किमत्र वक्तव्यमतो हरेर्बलं
हरात् परं सर्वत एव चेति || ४८ ||

तत: प्रणम्याऽशु जनार्द्दनं हर:
प्रसन्नदृष्ट्या हरिणाऽभिवीक्षित: |
जगाम कैलासममुष्य तद् धनु:
त्वया प्रभग्नं किल लोकसन्निधौ || ४९ ||

|| ५० ||

धनुर्यदन्यद्धरिहस्तयोग्यं
तत्कार्मुकात् कोटिगुणं पुनश्च |
वरं हि हस्ते तदिदं गृहीतं
मया गृहाणैतदतो हि वैष्णवम् || ५० ||

यदीदमागृह्य विकर्षसि त्वं
तदा हरिर्न्नात्र विचार्यमस्ति |
इति ब्रुवाण: प्रददौ धनुर्वरं
प्रदर्शयन् विष्णुबलं हराद् वरम् || ५१ ||

प्रगृह्य तच्चापवरं स राघव:
चकार सज्यं निमिषेण लीलया |
चकर्ष सन्धाय शरं च पश्यत:
समस्तलोकस्य च संशयं नुदन् || ५२ ||

प्र दर्शिते विष्णुबले समस्ततो
हराच्च नि:सङ्ख्यतया महाधिके |
जगाद मेघौघगभीरया गिरा
स राघवं भार्गव आदिपूरुष: || ५३ ||

अलं बलं ते जगतोऽखिलाद् वरं
परोऽसि नारायण एव नान्यथा |
विसर्जयस्वेह शरं तपोमये
महासुरे लोकमये वराद् विभो: || ५४ ||

पुराऽतुलो नाम महासुरोऽभवद्
वरात् स तु ब्रह्मण आप लोकताम् |
पुनश्च तं प्राह जगद्गुरुर्यदा
हरिर्जित: स्याद्धि तदैव वद्ध्यसे || ५५ ||

अतो वधार्थं जगदन्तकस्य
सर्वाजितोऽहं जितवद् व्यवस्थित: |
इतीरिते लोकमये स राघवो
मुमोच बाणं जगदन्तकेऽसुरे || ५६ ||

पुरा वरोऽनेन शिवोपलम्भितो
मुमुक्षया विष्णुतनुप्रवेशनम् |
स तेन रामोदरगो बहिर्गत:
तदाज्ञयैवाऽशु बभूव भस्मसात् || ५७ ||

इतीव रामाय स राघव: शरं
विकर्षमाणो विनिहत्य चासुरम् |
तपस्तदीयं प्रवदन् मुमोद
तदीयमेव ह्यभवत् समस्तम् || ५८ ||

निरन्तरानन्तविबोधसार:
स जानमानोऽखिलमादिपूरुष: |
वदञ्छृणोतीव विनोदतो हरि:
स एक एव द्वितनुर्मुमोद || ५९ ||

|| ६० ||

स चेष्टितं चैव निजाश्रयस्य
जनस्य सत्तत्वविबोधकारणम् |
विमोहकं चान्यतमस्य कुर्वन्
चिक्रीड एकोऽपि नरान्तरे यथा || ६० ||

तत: स कारुण्यनिधिर्न्निजे जने
नितान्तमैक्यं स्वगतं प्रकाशयन् |
द्विधेव भूत्वा भृगुवर्य आत्मना
रघूत्तमेनैक्यमगात् समक्षम् || ६१ ||

समेत्य चैक्यं जगतोऽभिपश्यत:
प्रणुद्य शङ्कामखिलां जनस्य |
प्रदाय रामाय धनुर्वरं तदा
जगाम रामानुमतो रमापति: || ६२ ||

ततो नृपोऽत्यर्थमुदाऽभिपूरित:
सुतै: समस्तै: स्वपुरीमवाप ह |
रेमेऽथ रामोऽपि रमास्वरूपया
तयैव राजात्मजया हि सीतया || ६३ ||

यथा पुरा श्रीरमण: श्रिया
तया रतो नितान्तं हि पयोब्धिमद्ध्ये |
तथा त्वयोद्ध्यापुरिगो रघोत्तमो
अप्युवास कालं सुचिरं रतस्तया || ६४ ||

इमानि कर्माणि रघूत्तमस्य
हरेर्विचित्राण्यपि नाद्भुतानि |
दुरन्तशक्तेरथ चास्य वैभवं
स्वकीयकर्त्तव्यतयाऽनुवर्ण्यते || ६५ ||

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यकृते*

*श्रीमहाभारततात्पर्यनिर्णये*

*अयोद्ध्याप्रवेशो नाम*

*चतुर्थोऽध्यायः*

--- ००० ---